शुक्लयजुर्वेदः

स्तरगतोद्देश्यम्

१. वैदिकवाङ्मयावगाहिप्रवचनाख्यानस्वशास्त्रेतिहासनिबन्धन-तुलनात्मकाध्ययनादिजनकगम्भीरज्ञानोत्पादनेन शास्त्रीयविचारानुसन्धानप्रवचनप्रचारसमर्थाया जनशक्तेरुत्पादनम्।

२. वैदिकवाङ्मयावगाहिप्रवचनाख्यानस्वशास्त्रीयेतिहास-निबन्धनकर्मोपासनज्ञानकाण्डगतमन्त्रार्थनिर्वचन-तुलनात्मकाध्ययनाध्यापनादिशक्त्युत्पादकगभीरज्ञानोत्पादनेन शास्त्रीयविचारानुसन्धान-प्रवचन-प्रचार-समर्थायाः स्नातकोत्तरस्तरोपयुक्तायाः जनशक्तेः समुत्पादनम्।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	वेदमन्त्रार्थज्ञानम्	१००	४०
द्वितीयपत्रम्	श्रौतयज्ञप्रकृतिज्ञानम्	१००	४०
तृतीयपत्रम्	मन्त्रार्थनिर्वचनज्ञानम्	१००	४०
चतुर्थपत्रम्	विधिज्ञानम्	१००	४०
पञ्चमपत्रम्	वेदपदार्थानुसन्धानम्	१००	४०

पत्रम् - प्रथमम्

पाठ्यांशनाम - वेदमन्त्रार्थज्ञानम्

पाठ्यांशस्योद्देश्यम्

१: स्वशाखासम्बद्धमन्त्रभागस्य ऋषिदेवताच्छन्दोविनियोगादि-सहितार्थज्ञानोत्पादनम्।

२. इष्टिपशुसोमप्रकृतिकयज्ञविशेषज्ञानोत्पादनम् ।
३. वैदिकशब्दनिर्वचनस्वरसंस्कारविषयकसाधिकारज्ञानोत्पादनम् ।
४. वैदिककर्ममीमांसापूर्वकविधिभेदापूर्वादिधर्मभावनाजनकज्ञानोत्पादनम् ।

प्रकरणविभाग:

प्रकरणानि	पाठ्यांशविषया:	पाठघण्टा:	अङ्का:
क	शतरुद्रीयहोममन्त्रार्थनिरूपणम्	३६	२०
ख	चित्यारोहणवसोर्धारादिमन्त्रार्थनिरूपणम्	३६	२०
ग	सौत्रामणीयागमन्त्रार्थनिरूपणम्	१८	१०
घ	सेकासन्धादिहौत्रान्तयाज्याप्रैषादि-मन्त्रार्थनिरूपणम्	३६	२०
ङ	अश्वमेधादियज्ञमन्त्रार्थनिरूपणम्	३६	२०
च	अश्वाङ्गदेवताहोमखिलयज्ञादिमन्त्रार्थ-निरूपणम्	१८	१०
योग:		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

शुक्लयजुर्वेदमाध्यन्दिनसंहिताया महीधरभाष्यसहिताया: षोडशा(१६)ध्यायस्य निम्नाङ्किता: ६० मन्त्रा: -

१. नमस्ते रुद्र.
२. या ते रुद्र.
३. यामिषुम्.
४. शिवेन वचसा.
५. अध्यवोचदधि.
६. असौ यस्ताम्र:.
७. असौ योऽवसर्पति.
८. नमोऽस्तु नीलग्रीवाय.
९. प्रमुञ्च धन्वन:.
१०. विज्यं धनु:.
११. या ते हेति:.
१२. परितेधन्वन:.
१३. अवतत्य धनु:.
१४. नमस्त आयुधाय.

१५. मानो महान्तम्.	१६. मानस्तोके.
१७. नमो हिरण्यबाहवे.	१८. नमो बब्लुशाय.
१९. नमो रोहिताय.	२०. नमः कृत्स्नायतया.
२१. नमो वञ्चते.	२२. नमऽउष्णीषिणे.
२३. नमो विसृजद्भ्यः.	२४. नमः सभाभ्यः.
२५. नमो गणेभ्यः.	२६. नमः सेनाभ्यः.
२७. नमस्तक्षभ्यः.	२८. नमः श्वभ्यः.
२९. नमः कपर्दिने.	३०. नमो ह्रस्वाय.
३१. नमऽआशवे.	३२. नमो ज्येष्ठ्याय.
३३. नमः सोभ्याय.	३४. नमो वन्याय.
३५. नमो विल्मिने.	३६. नमो धृष्णवे.
३७. नमः स्रुत्याय.	३८. नमः कुप्याय.
३९. नमो वात्याय.	४०. नमः शङ्गवे.
४१. नमः शंभवाय.	४२. नमः पर्णाय.
४३. नमः सिकत्याय.	४४. नमो व्रज्याय.
४५. नमः शुष्क्याय.	४६. द्रापेऽअन्धसस्पते.
४७. इमा रुद्राय.	४८. या ते रुद्रशिवा.
४९. परि नो रुद्रस्य.	५०. मीढुष्टम.
५१. विकिरिद्र.	५२. सहस्राणि सहस्रशः
५३. असंख्याता.	५४. अस्मिन्महति.
५५. ये वृक्षेषु	५६. ये तीर्थानि.
५७. येऽन्नेषु	५८. नमोऽस्तुरुद्रेभ्यो ये दिवि.
५९. नमोऽस्तु...येऽन्तरिक्षे.	६०. नमोऽस्तु..ये पृथिव्याम्.

ख) प्रकरणे

शुक्लयजुर्वेदमाध्यन्दिनसंहिताया महीधरभाष्यसहितायाः सप्तदशा(१७) ध्यायस्य निम्नाङ्कितानां ३६ मन्त्राणामर्थावगतिः-

१. अस्मन्नूर्जम्.	२. इमा मेऽअग्न.
३. समुद्रस्य त्वावकया.	४. हिमस्य त्वा.

५.	अपामिदम्.	६.	अग्ने पावक.
७.	स नः पावकः.	८.	नमस्ते हरसे.
९.	नृषदेवेडप्सु..	१०.	ये देवा देवानाम्.
११.	प्राणदाऽअपानदा.	१२.	न तं विदाथ.
१३.	विश्वकर्मा ह्यजनिष्ट.	१४.	आशुः शिशानः.
१५.	सङ्क्रन्दनेन.	१६.	सऽइषु हस्तैः.
१७.	बृहस्पते परि दीया.	१८.	बलविज्ञायः.
१९.	गोत्रभिदम्.	२०.	अभिगोत्राणि०
२१.	इन्द्रऽआसाम्.	२२.	इन्द्रस्य वृष्णः०
२३.	उद्धर्षय०	२४.	अस्माकमिन्द्रः.
२५.	अमीषाञ्चित्तम्.	२६.	अवसृष्टा परापत.
२७.	प्रेता जयता.	२८.	असौ या सेना.
२९.	यत्र वाणाः.	३०.	मर्माणि ते.
३१.	उदेनमुत्तराम्.	३२.	चित्तिं जुहोमि.
३३.	सप्त तेऽअग्ने.	३४.	घृतं मिमिक्षे.
३५.	चत्वारि शृङ्गा.	३६.	धामन्ते विश्वम्.

तथा च अष्टादशा(१८) ध्यायस्य निम्नाङ्किता २३ मन्त्राः -

१.	वाजश्च मे.	२.	प्राणश्च मे.
३.	सत्यञ्च मे श्रद्धा.	४.	ब्रीहयश्च मे.
५.	अश्मा च मे.	६.	स्त्रुचश्च मे.
७.	एका च मे.	८.	चतस्त्रश्च मेऽष्टौ.
९.	पयःपृथिव्याम्.	१०.	ऋताषाडृतधामा.
११.	यस्तेऽअग्ने सूर्ये.	१२.	तत्वा यामि.
१३.	स्वर्णे घर्मः.	१४.	दिवो मूर्धासि.
१५.	इष्टो यज्ञो भृगुभिः	१६.	इष्टोऽअग्निः.
१७.	प्रतरेण परिधिना.	१८.	यद्दत्तं यत्परा.
१९.	यत्र धारा.	२०.	वार्त्रहत्याय.
२१.	सह दानुम्.	२२.	वैश्वानरो नः.
२३.	पृष्टो दिवि.		

ग) प्रकरणे

महीधरभाष्यसहितायाः शुक्लयजुर्वेदसंहितायाः ऊनविंशा (१९) ध्यायस्य निम्नाङ्कितानाम् ३० मन्त्राणामर्थाः-

१. स्वाद्वीन्त्वा.	२. परीते षिञ्चता.
३. पुनाति ते.	४. तेजोऽसि तेजो मयि.
५. या व्याघ्रम्.	६. देवा यज्ञमतन्वत.
७. सोमस्य रूपम्.	८. आसन्दीरूपम्.
९. हविर्धानं यदश्विना.	१०. आश्रावयेति.
११. व्रतेन दीक्षाम्.	१२. सुरावन्तम्.
१३. पितृभ्यः स्वधायिभ्यः.	१४. पुनन्तु मा पितरः.
१५. पुनन्तु मा देवजनाः.	१६. ये समानाः समनसः.
१७. द्वे सृतीऽअशृणवम्.	१८. इदं हविः.
१९. अङ्गिरसो नः.	२०. येन पूर्वे.
२१. उपहूताः पितरः.	२२. आयन्तु नः पितरः.
२३. येऽअग्निष्वाता येऽअनग्निष्वाता.	२४. यमग्ने.
२५. ये चेह पितरः.	२६. उशन्तस्त्वा.
२७. सोमो राजाऽमृतम्.	२८. रेतो मूत्रम्.
२९. सरस्वतीयोन्याम्.	३०. तेजः पशूनाम्.

घ) प्रकरणे

महीधरभाष्यसहितायाः शुक्लयजुर्वेदसंहिताया विंशा- (२०)ध्यायस्य निम्नाङ्कितानां ४० मन्त्राणामर्थावगतिः -

१. क्षत्रस्य योनिरसि.	२. निषसाद धृतव्रतः.
३. देवस्य त्वा सवितुः.	४. कोऽसि कतमोऽसि.
५. शिरो मे.	६. जिह्वा मे.
७. बाहू मे.	८. पृष्टीर्मे.
९. नाभिर्मे.	१०. प्रतिक्षत्रे प्रतितिष्ठामि.
११. त्र्या देवाऽएकादश.	१२. यद्देवा देवहेडनम्.
१३. यदि दिवा यदि.	१४. यदि जाग्रद्यदि.

१५.	यद्ग्रामे यदरण्ये.	१६.	समुद्रे ते हृदयम्.
१७.	द्रुपदादिव.	१८.	उद्वयं तमसस्परि.
१९.	एधोऽस्येधिषीमहि.	२०.	अभ्यादधामि.
२१.	समिद्धमिन्द्र.	२२.	आयात्विन्द्रोऽवसे.
२३.	समिद्धोऽअग्निः.	२४.	तनूपा भिषजा.
२५.	इन्द्रायेन्दुम्.	२६.	आजुह्वाना सरस्वती.
२७.	अश्विना नमुचे.	२८.	कवष्यो न.
२९.	तिस्रस्त्रेधा सरस्वती.	३०.	क्रतुथेन्द्रः.
३१.	अश्विना हविः.	३२.	यऽइन्द्रऽइन्द्रियम्.
३३.	अश्विना गोभिः.	३४.	युवꣳसुरामम्.
३५.	अश्विना तेजसा.	३६.	गोमदूषुणा.
३७.	चोदयित्री सूनृनाम्०.	३८.	महोऽअर्णः.
३९.	इन्द्रायाहिचित्रभानो.	४०.	अश्विना पिबताम्.

महीधरभाष्यसंहितायाः शुक्लयजुर्वेदसंहितायाः एकविंशा(२१) ध्यायस्य निम्नाङ्कितविंशतिमन्त्रार्थावगतिः -

१.	इमम्मे वरुण.	२.	तत्वा यामि.
३.	त्वन्नोऽअग्ने.	४.	सत्वन्नोऽअग्ने.
५.	सुनावमारुहेयम्.	६.	आ नो मित्रावरुणा.
७.	तनूनपाच्छुचिव्रत.	८.	तिस्रऽइडा सरस्वती.
९.	वसन्तेन ऋतुना.	१०.	ग्रीष्मेण ऋतुना.
११.	वर्षाभिर्ऋतुना.	१२.	शारदेन ऋतुना.
१३.	हेमन्तेन ऋतुना.	१४.	शैशिरेण ऋतुना.
१५.	देवं बर्हिः.	१६.	देविर्द्वारोऽअश्विना.
१७.	देवी जोष्ट्री.	१८.	देवऽइन्द्रः.
१९.	अग्निमद्य.	२०.	त्वामद्य ऋषे.

ङ) प्रकरणे

महीधरभाष्यसहितायाः शुक्लयजुर्वेदसंहिताया द्वाविंशा-(२२)ध्यायस्य निम्नाङ्कितद्वादशमन्त्राणामर्थाः -

१.	तेजोऽसि शुक्रम्.	२.	इमामगृभ्णन्.

३. अभिघाऽअसि.   ४. हिरण्यपाणिम्.
५. रातिꣳसत्पतिम्.   ६. अग्निꣳस्तोमेन.
७. स हव्यवाड्.   ८. अग्निन्दूतम्
९. अजीजनो हि.   १०. काय स्वाहा.
११. विश्वो देवस्य.   १२. आ ब्रह्मन्ब्राह्मणः.

तथा च त्रयोविंशा(२३)ध्यायस्य निम्नाङ्कितस्त्रिंशन्मन्त्रार्थाः -

१. हिरण्यगर्भः.   २. यः प्राणतो निमिषतः.
३. युञ्जन्ति ब्रध्नम्.   ४. यद्वातोऽअपः.
५. कः स्विद् एकाकी.   ६. सूर्यऽएकाकी.
७. स्वयं वाजिन्.   ८. प्राणाय स्वाहा.
९. गणानान्त्वा.   १०. ऊर्ध्वामेनाम्.
११. दधिक्राव्णः.   १२. गायत्री त्रिष्टुब्.
१३. द्विपदा याः.   १४. द्यौस्ते पृथिवी.
१५. किंꣳस्वित्सूर्यसमम्.   १६. ब्रह्मसूर्यसमम्.
१७. पृच्छामि त्वा चित्तये.   १८. अपि तेषु त्रिषु.
१९. केष्वन्तः पुरुषः.   २०. पञ्चस्वन्तः.
२१. काऽइमरे.   २२. अजारेपिशङ्गिला.
२३. कत्यस्य विष्ठा.   २४. षडस्य विष्ठा.
२५. कोऽअस्य वेद.   २६. वेदाहमस्य.
२७. पृच्छामि त्वा परमन्तम्.   २८. इयं वेदिः.
२९. सुभूः स्वयंभू.   ३०. होता यक्षत्.

एवमेव चतुर्विंशा(२४)ध्यायस्य निम्नाङ्कितानामष्टादश-मन्त्राणामर्थाः -

१. अश्वस्तूपरः.   २. रोहितो धूम्ररोहित-
३. शुद्धबालः.   ४. शिल्पा वैश्वदेवाः.
५. कृष्णाग्रीवाऽआग्नेया शितिबभ्रवः.   ६. एताऽऐन्द्राग्ना.
७. कृष्णा भौमा.   ८. धूम्रान्वसन्ताय.
९. पष्ठवाहो विराजः.   १०. उक्ताःसञ्चारा एता.
११. वसन्ताय कपिञ्जलान्.   १२. समुद्राय शिशुमारान्.

१३. सोमाय हंसान्.	१४. अग्नये कुटारून्.
१५. अह्ने पारावतान्.	१६. भूम्याऽआखून्.
१७. ईशानाय परस्वतः.	१८. प्रजापतये पुरुषान्.

च) प्रकरणे

महीधरभाष्यसहितायाः शुक्लयजुर्वेदसंहितायाः पञ्चविंशा (२५)ध्यायस्य निम्नाङ्कितानामष्टादशमन्त्राणामर्थाः -

१. शादन्दद्भिः	२. वातं प्राणेन.
३. अग्नेः पक्षतिः.	४. यस्ये मे हिमवन्तः.
५. आनो भद्राः.	६. देवानां भद्राः.
७. तान्पूर्वया.	८. तन्नो वातः.
९. तमीशानम्.	१०. स्वस्ति नः.
११. पृषदश्वा मरुतः.	१२. भद्रङ्कर्णेभिः.
१३. शतमिन्नु.	१४. अदितिर्द्यौरदितिः.
१५. यदूवध्यम्.	१६. यदश्वाय वासः.
१७. यत्ते सादे.	१८. इमानु कं भुवना.

तथैव षड्विंशा(२६)ध्यायस्य निम्नाङ्कितानां द्वादशमन्त्राणामर्थावगतिः -

१. अग्निश्च पृथिवी च.	२. यथेमां वाचम्.
३. ऋतावानं वैश्वानरम्.	४. यद्वाहिष्ठम्.
५. सह्यूषु ब्रवाणि.	६. उपह्वरे गिरिणाम्.
७. उच्चाते जातम्.	८. स नऽइन्द्राय.
९. अभि यज्ञम्.	१०. द्रविणोदाः पिपीषति.
११. स्वादिष्ठया मदिष्ठया.	१२. रक्षोहा विचर्षणिः.

पाठ्यग्रन्थः

१. शुक्लयजुर्वेदमाध्यान्दिनसंहिता महीधरभाष्योपेता १६-२६ अध्यायान्ता ।

सहायकग्रन्थौ

१. शुक्लयजुर्वेदमाध्यन्दिनसंहिताया १६-२६ अध्यायान्तम्, उव्वटभाष्यम् ।

२. सम्बद्धं काण्वभाष्यम् ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - द्वितीयम्

पाठ्यांशनाम - श्रौतयज्ञप्रकृतिज्ञानम्

पाठ्यांशस्योद्देश्यम्

१. श्रौतयज्ञद्वारभूतानां श्रौताधान-दर्शपूर्णमासनिरूढपशुबन्धसोम-यागानां सैद्धान्तिकस्य (यथासंभवं प्रायोगिकस्य पारिभाषिक-स्यापि) ज्ञानस्योत्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	दर्शेष्ट्यादिविशेषविधिः	३६	२०
ख	अग्न्याधानादिमित्रविन्देष्ट्यन्तो विधिः	३६	२०
ग	सपशुकः सोमविधिः	३६	२०
घ	सोमयागविधिः	३६	२०
ङ	माध्यन्दिनसवनत इष्टिपशुकर्मान्तो ब्रह्मविधिः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

कात्यायन-श्रौतसूत्रस्य कर्कभाष्यसहितस्य चतुर्थाध्यायोक्ताः 'अ'-''आ'' अंशयोर्निर्दिष्टा निम्नाङ्किताः प्राकरणिकसूत्रपदार्थटिप्पण्यः।

'अ' - निम्नाङ्किता विषयाः -

१. पिण्डपितृयज्ञः
२. दर्शयागः
३. अतिदेशनियमाः
४. दाक्षायणयज्ञः
५. काम्यकर्मातिदेशनियमाः
६. गार्हपत्याधानम्
७. अग्निविभागाः
८. अग्न्यागाराणि
९. अग्न्याधानपदार्थक्रमः
१०. आहवनीयाधानम्
११. दक्षिणाग्न्याधानम्
१२. पुनराधानम्
१३. अग्न्युपस्थानम्
१४. अग्निहोत्रम्
१५. सायम्प्रातर्होमविशेषश्चेति १५ विषयज्ञानम्।

'आ' - निम्नाङ्कितसूत्रपदार्थपरिभाषणटिप्पण्यः

अध्यायाः	कण्डिकाङ्काः	सूत्राङ्काः	संहत्य
४	१	१, ५, १७, २५, ३० चेति	५ सूत्राणि
४	२	३, ५, १४, ३०, ४६, ४८ चेति	६ सूत्राणि
४	३	१, ७, ८, २० चेति	४ सूत्राणि
४	४	३, १२, २३, २५, २७ चेति	५ सूत्राणि
४	५	१, ८, २२, २३, २५ चेति	५ सूत्राणि
४	६	१, ७, ९ चेति	३ सूत्राणि
४	७	१, १०, १२, १३ चेति	४ सूत्राणि
४	८	८, १२, १९ चेति	३ सूत्राणि
४	९	७, १४, १५, १७ चेति	४ सूत्राणि
४	१०	३, ७-१४ चेति	९ सूत्राणि
४	११	१-७, १० चेति	८ सूत्राणि

४	१२	५, ११, २२ चेति	३ सूत्राणि
४	१३	१, ५, ९, १४ चेति	४ सूत्राणि
४	१४	४, १९, २६ चेति	३ सूत्राणि
४	१५	१, ३, ८, ९, १०, १३, २८, ३४ चेति	८ सूत्राणि

ख) प्रकरणे

कर्कभाष्योपेतस्य का.श्रौ.सूत्रस्य ५ अध्यायस्य निम्नाङ्किता 'अ-आ' विषयोक्ताः प्राकरणिकसूत्रपदार्थपरिभाषाटिप्पण्यः।

अ) विषयवस्तुज्ञानम्

१. चातुर्मास्यम्
२. वैश्वदेवपर्व
३. चतुःपर्वसाधारणं हविः
४. वरुणप्रघासः
५. करम्भपात्राणि
६. करीरावापः
७. करम्भपात्रहोमः
८. वाजिनशेषभक्षणाधिकारिविवेकः
९. शाकमेधः
१०. हविः शेषोदनभक्षणाधिकारिविवेकः शाकमेधमध्येऽग्निहोत्रहोमश्च
११. क्रीडनीयेष्टिप्रचारः
१२. पित्र्येष्टिः
१३. सामिधेन्याश्रावप्रत्याश्रावप्रकारः
१४. त्र्यम्बकेष्टिः
१५. शुनासीरपर्ववैशिष्ट्यम्, मित्रविन्देष्टिपरिचयश्चेति १५ विषयज्ञानम्।

'आ'- प्राकरणिकार्थपदपरिभाषाटिप्पण्यः

क्रमसं.	अध्यायः	कण्डिका-	सूत्राङ्काः	संहत्य
१.	पञ्चमः	प्रथमा	१-६, ९, १६, १५	९ सूत्राणि
२.	"	द्वितीया	१-३, १७-१९	६ सूत्राणि
३.	"	तृतीया	३, ८, १४, २४, ३२	५ सूत्राणि
४.	"	चतुर्थी	१, ८, १६, १७, १९	५ सूत्राणि
५.	"	पञ्चमी	३, १५, २३, ३१	४ सूत्राणि

६.	"	षष्ठी	१, ८, १४, २३	४ सूत्राणि
७.	"	सप्तमी	१, २, ५, ६, ८	५ सूत्राणि
८.	"	अष्टमी	१, ५, ६, ८-१२, १६, २५	१० सूत्राणि
९.	"	नवमी	५-८, ९, २१, ३१	७ सूत्राणि
१०.	"	दशमी	२, ४, ६, २१	४ सूत्राणि
११.	"	एकादशी	१, २, ४, ५, १२-१५, १९	९ सूत्राणि
१२.	"	द्वादशी	१, २, ४, ९	४ सूत्राणि
१३.	"	त्रयोदशी	२, ३, ४	३ सूत्राणि

ग) प्रकरणे

कात्यायन-श्रौतसूत्रस्य कर्कभाष्योपेतस्य ६-७ अध्याययोर्निम्नाङ्किता 'अ'-'आ' अंशोक्ताः प्राकरणिकसूत्रार्थटिप्पण्यः

'अ' प्राकरणिकविषयज्ञानम्

१. निरूढपशुबन्धः
२. वेदिनिर्माणप्रकारः
३. पात्रासादनोपयोगौ
४. प्रयाजसङ्ख्यानानुष्ठानक्रमद्रव्यदेवताः
५. पश्वङ्गहव्यानि
६. संज्ञपनम्
७. अनुयाजसङ्ख्यानुष्ठानक्रमद्रव्यदेवताः
८. सोमयागपरिचयः
९. सोमयागाधिकारिविवेकपूर्वकः सोमपूर्वतापक्षः
१०. ऋतुनक्षत्रादिसमेतः सोमारम्भकालः
११. सपशुके सोमे प्रयाजानुयाजसवनीयादिपशुसङ्ख्याः
१२. सौमिकर्त्विग्गणस्तद्वरणक्रमश्च
१३. प्रथमदिनकृत्यानि (सौमिकानि)
१४. द्वितीयदिनकृत्यानि
१५. सोमक्रयणद्रव्यं तत्क्रयणसोमशेषभक्षणावभृथेष्टिपरिचयाः

'आ' प्राकरणिकसूत्रपदार्थपरिभाषाटिप्पण्यः

कात्यायनश्रौतसूत्रस्य ६-७ अध्याययो(सकर्कभाष्ययोः)

निर्म्नाङ्कितसूत्रपदार्थादयः -

अध्यायाः	कण्डिकाः	सूत्राणि	संहत्य
६	१	१-४,९-१०,१५-२०,२४-३३ चेति	२२ सूत्राणि
"	२	१-२१ चेति	२१ सूत्राणि
"	३	३,८,१०,१६,१८-२१,२४,२६ चेति	१० सूत्राणि
"	४	२, ४, ५-७, ११-१२ चेति	७ सूत्राणि
"	५	१-३,७,१२-१३,१५-१८,२५ चेति	११ सूत्राणि
"	६	१-३, ११-१२, १७, २५ चेति	७ सूत्राणि
"	७	१-७, १६, २९ चेति	९ सूत्राणि
"	८	१-३, ७, १४, १८, १९ चेति	७ सूत्राणि
"	९	१-६, १२ चेति	७ सूत्राणि
"	१०	९,११,१७,२२-२४,३०,३४ चेति	८ सूत्राणि

अध्यायः	कण्डिकाः	सूत्राणि	संहत्य
७	१	१-२९ चेति	२९ सूत्राणि
"	२	१-३७ चेति	३७ सूत्राणि
"	३	३, १०-१३, १७, २२, २५-२६ चेति	९ सूत्राणि
"	४	१-११,१८-२१,२७-२८,३०,३२ चेति	१९ सूत्राणि
"	५	१-२७ चेति	२७ सूत्राणि
"	६	१-२, १२, १६, १८ चेति	५ सूत्राणि
"	७	१, ४, ९-१९ चेति	१३ सूत्राणि
"	८	१-२५ चेति	२५ सूत्राणि
"	९	४, ९-१३, २४-२८ चेति	११ सूत्राणि

घ) **प्रकरणे**

कात्यायनश्रौतसूत्रस्य कर्कभाष्यसहितस्य ८-९ अध्यायगता निम्नाङ्किता - 'अ', 'आ' - अंशोक्ता विषयाः ।

'अ'

१. आतिथ्येष्टिः

२. तानूनप्त्रम्

३. प्रवर्ग्यः

४. उपसदिष्टिः

५. वेदिमानम्

६. अन्तःपात्यः

७. प्रक्रमः

८. उपरवदेशनिर्मितिः

९. पृष्ठ्यामानम्

१०. हविर्धानमण्डपनिर्माणम्

११. उत्तरवेदिमानम्

१२. अधिषवणफलकलक्षणम्

१३. अधिषवणफलकनिधानपूर्वकमधिषवणग्रावनिधानम्

१४. सदोमण्डपनिर्माणप्रकारः

१५. औदुम्बरीशाखामान-निखातने

१६. धिष्ण्याहवनीय-बहिष्पवमानदेश-चात्वालो-त्कर-शामित्र-शालादिनिर्माणप्रकारः

१७. यूपैकादशिनीत्वे वेदीवर्धन-यूपावट-खननो-पाशुनोपांशुशेष-निधानादिविशेषव्यवस्था

१८. एकयूपत्वे सर्वेषां पशूनां अन्वारम्भणादिकर्मणां सकृदनुष्ठानमात्रता

१९. पात्नीवतयूपसंकारः

२०. पात्नीवतयूपपश्वोर्विशेषता

२१. वसतीवरिवारिपरिग्रहः

२२. दीक्षितादीक्षिताध्वर्य्वादेर्निर्वासोन्मर्दनादिनिषेधः

२३. प्रातरनुवाक-प्रातः सवनीयेष्टि-देवता-द्रव्याणि

२४. सौमिकपात्रलक्षणानि

२५. सोमाभिषव-प्रहार-सङ्ख्यानुसारं विशेषफलोदयः

२६. उपसर्पणसंज्ञकं धिष्ण्योपस्थानम्

२७. उपांशुमहा-क्षुल्लकाभिषवभेदाः

२८. द्विदेवत्यग्रह-होमशेषभक्षणप्रकारः

२९. हविःशेषभक्षणक्रमः

३०. स्तोत्रशस्त्रभेद-चमसग्रहपात्र-प्रक्षालन-स्थापनव्यवस्था ।

'आ' सूत्रार्थपरिभाषाटिप्पण्यः

कात्यायनश्रौतसूत्रस्य कर्कभाष्यसहितस्य८-९ अध्याय-योरधोऽङ्कितानां सूत्राणां पदार्थपरिभाषणपूर्वकः प्राकरणिकोऽर्थः

अध्यायाः	कण्डिकाः	सूत्राणि	संहत्य
८	१	१, ३, १५-१६, १९ चेति	५ सूत्राणि
"	२	१-३, १०, १३, १५, ३३, ३४ चेति	८ सूत्राणि
"	३	१-११, २३, २६, २९ चेति	१४ सूत्राणि
"	४	८, १४, १७, २१, २६ चेति	५ सूत्राणि
"	५	११, १९, २०, २४, ३० चेति	५ सूत्राणि
"	६	१,३,४,११,१३,१६-१९,२४,२८,-३०,३४ चेति	१३ सूत्राणि
"	७	१९, २१, २३, २४ चेति	४ सूत्राणि
"	८	६-८,१२-१३,१८-१९,२१-२३,-२५-२८,३५-३७ चेति	१७ सूत्राणि
"	९	१, ६-९, १५, २१, २३, २५ चेति	९ सूत्राणि
९	१	१, ४, १५, १६ चेति	४ सूत्राणि
"	२	१-२३ चेति	२३ सूत्राणि
"	३	३, ९, ११, १६-१८ चेति	६ सूत्राणि
"	४	१, ३, ७, १४-१८ चेति	८ सूत्राणि
"	५	१-१२, २८-३१ चेति	१६ सूत्राणि
"	६	१८-२०, २६-२७, २९-३० चेति	७ सूत्राणि
९	७	१-४ चेति	४ सूत्राणि
"	८	१-४, १२-१८ चेति	११ सूत्राणि
"	९	१-२, ६, १९-२२ चेति	७ सूत्राणि
"	१०	१-२, ९-११ चेति	५ सूत्राणि
"	११	१-५, १३-२१ चेति	१४ सूत्राणि
"	१२	१-३, १६-१८ चेति	६ सूत्राणि
"	१३	१-३, ५, १७-२७ चेति	१५ सूत्राणि
९	१४	१, ७-८, २३ चेति	५ सूत्राणि

ङ) प्रकरणे

कात्यायनश्रौतसूत्रस्य १०-११ अध्याययोः कर्कभाष्य-सहितयोः अधोऽङ्किता 'अ-आ' अंशोक्ता विषयास्तेषां पदार्थ-टिप्पण्यश्च ।

'अ' विषयज्ञानम्

१. माध्यन्दिनसवनम्
२. निङ्गनम्
३. पर्यायाभिषवः
४. प्रवर्ग्यः
५. प्राणभक्षणम्
६. दाक्षिणहोमः
७. सौमिकदक्षिणापदार्थः
८. सौमिकदक्षिणाविभाजनप्रकारः
९. उक्थ्यादिःसोमविकृतिः
१०. ज्योतिष्टोमविभागाः
११. सोमे वैश्यराजन्ययोः सोमप्रतिनिधिद्रव्यम्
१२. विप्रुड्ढोमः
१३. ब्रह्मगणवरणम्
१४. इष्टिपश्वोर्ब्रह्मकर्माणि
१५. सोमयागस्य वैशिष्ट्यम्

'आ' - निम्नाङ्कितसूत्राणां पदार्थपरिभाषाटिप्पण्यः

अध्यायाः	कण्डिकाः	सूत्राणि	संहत्य
१०	१ "	१, ६, ७, १८, २३ चेति	५ सूत्राणि
"	२ "	७-१०, ३४, ३७ चेति	६ सूत्राणि
"	३ "	२, १८ चेति	२ सूत्राणि
"	४ "	२, १२ चेति	२ सूत्राणि
"	५ "	१५-१६ चेति	२ सूत्राणि
"	६ "	२१-२३ चेति	३ सूत्राणि
"	७ "	१४-१५ चेति	२ सूत्राणि
"	८ "	१२-१३ चेति	२ सूत्राणि
"	९ "	१६, १७, २४, २६, २८, ३० चेति	६ सूत्राणि
११	१ "	१-३, १२-१३, १८, २०, २२-२३, २८-२९ चेति	१० "

पाठ्यग्रन्थः

कात्यायनश्रौतसूत्रस्य कर्कभाष्योपेतस्य संबद्धांशाः

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - तृतीयम्

पाठ्यांशनाम - मन्त्रार्थ-निर्वचन-ज्ञानम्

पाठ्यांशगतोद्देश्यम्

१. कर्मोपासनाज्ञानकाण्डान्तर्गतवैदिकमन्त्रार्थज्ञानोत्पादनम् ।

२. वैदिकमन्त्रार्थ-निर्वचनादिबोधनम् ।

३. मन्त्रभागस्य यथासम्भवं ऋषिदेवताछन्दोविनियोगादिसहितार्थ-ज्ञानोत्पादनम् ।

४. इष्टिपशु-सोम-प्रकृतिकवैदिकयज्ञयागादिविशेषज्ञानोत्पादनम् ।

५. वैदिकशब्दार्थ निर्वचन-स्वरसंस्कार-विषयक साधिकारज्ञानो-त्पादनम् ।

६. मीमांसादर्शनस्य वैशिष्ट्यज्ञानपूर्वकं ब्रह्मचिन्तन-विधिभेदा-पूर्वादिधर्मभावनाजनकज्ञान-संपादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	ऐकपदिकशब्दार्थनिर्वचनम्	३६	२०
ख	नैगमकाण्डान्तर्गतवैदिकमन्त्रार्थनिर्वचनम्	५४	३०
ग	दैवतकाण्डान्तर्गतमन्त्रार्थनिर्वचनम्	३६	२०
घ	कठोपनिषन्मन्त्रार्थविवेचनम्	३६	२०
ङ	ईशोपनिषन्मन्त्रार्थनिरूपणम्	१८	१०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

अनेकार्थबोधकानां निम्नाङ्कितानां मर्यादिशब्दानां निर्वचनं तदुदाहरणस्वरूपाणां मन्त्राणामर्थबोधश्च ।

१) क) तत्रादावैकपदिककाण्डसारांशः ।
ख) ऐकपदिकानवगतसंस्कार-शब्दयोर्निरुक्तिश्च ।
२) मर्यः - को नु मर्या .... अस्मदीषते ।
३) निधा - वयः सुपर्णा .... निधयेव बद्धान् ।
सुपर्णा - " "
४) दमूनाः - जुष्टो दमूना .... भोजनानि ।
५) मूषः - सं मां तपन्ति .... अस्य रोदसी ।
६) वासराणि - इषिरेण ते ..... सूर्यो वासराणि ।
७) जठरम् - मरुत्वाँ इन्द्र ..... प्रदिवः सुतानाम् ।
८) तितउ - सक्तुमिव .... लक्ष्मीर्निहिताधि वाचि ।
९) हंसः - इर्मान्तासः ..... दिव्यमज्ममश्वाः ।
शूरः -
१०) कायमानः - कायमानः ...... सन्निहा भव ।
११) कनीनका - कनीनकेव ..... यामेषु शोभेते ।
१२) शुन्ध्युवः - उषो अदर्शि सुन्ध्युवः ..... पुनरेयुषीणाम् ॥

१३) अकूपारः – विधाम तस्य ते वयमकूपारस्य दावने ।

१४) अप्रायुवः – देवा नो यथा ..... रक्षितारो दिवे दिवे ।

१५) च्यवनः – युवं च्यवानम् ..... चरथाय तक्षथुः ।

१६) जामि – आ घा ता गच्छान् ..... सुभगे पतिं मत् ।

१७) बन्धुः – द्यौर्मे पिता .... दुहितुर्गर्भमाधात् ।

१८) अदितिः – अदितिर्द्यौः .... अदितिर्जनित्वम् ।

१९) वस्त्रम् – उतस्मैनम् ..... पशुपच्च यूथम् ।

२०) भ्राता – अस्य वामस्य .... विश्पतिं सप्तपुत्रम् ।

२१) चक्रम् – सप्तयुञ्जन्ति .... विश्वा भुवनाधितस्थुः ।

निम्नाङ्कित-शब्दार्थ-निर्वचनमात्रम्-

२२) पाश्या । पृष्ठम् । अङ्गम् । यकृत् ।

२३) अतिथिः । त्रितः । शीरम् । भेदः ।

२४) तारु । सुविते । दुर्वतुः । राधः ।

२५) कच्छपः । रजः । अङ्गः । अद्मसत् ।

२६) हरः । अजामि । ज्ञातिः । जहा ।

२७) भरः । संवत्सरः । ग्रीष्मः । वृषभः ।

२८) वर्षा । हेमन्तः । कन्या । सप्त ।

२९) चक्षुः । भद्रम् । लक्ष्मीः । यूथम् ।

३०) अश्वः । दुरीण । मरुत्वान् । पार्श्वः ।

ख) प्रकरणे

१) सस्निम् । सस्निमविन्दच्चरणे नदीनाम् ।
दूतः । दूतो देवानामसि मर्त्यानाम् ।

२) वावसानः । सप्त स्वसृररुषीर्वावसानः ।
सचा । वसुभिः सचा भुवा ।

३) अन्धः । आमत्रेभिः सिञ्चता मद्य मन्धः ।
दूळ्यः । वयं जयेम पृतनासु दूळ्यः ।

४) तरुष्यति । इन्द्रेण युजा तरुषेम वृत्रम् ।

५) मदाहनः । अन्येन मदाहनो याहि तूर्यम् ।
शंभुः । द्विता च सत्ता स्वधया च शंभुः ।

६) ऊतिः । आ त्वा रथं यथोतये ।
ससम् । ससं न पक्वमविदच्छुचन्तम् ।

७) नदः । नदस्य मारुधतः काम आगन् ।

८) अक्षाः । न यस्य .... सोमो अक्षाः ।

९) श्वात्रम् । स पतत्रीत्वरम् .... अग्निरकृणोज्जातवेदाः ।
जातवेदः ।

१०) वराहः । विध्यद्वराहं तिरोमद्रिमरता ।

११) स्वसराणि । इस्रा इव स्वसराणि ।

१२) शर्याः । शर्याभिर्न भरमाणौ गभस्त्योः ।

१३) अर्कः । गायन्ति त्वा ...... उद्वंशमिव येमिरे ।

१४) पविः । उत पव्या ..... भिन्दन्त्योजसा ।

१५) धन्वः । तिरोधन्वानि रोचते ।

१६) पवित्रम् । येन देवाः पवित्रेणात्मानं पुनते सदा ।

१७) शिपिविष्टः । किमित्ते विष्णो ..... समिथे बभूथ ।

१८) आघृणि । आघृणे सं सचावहे ।

१९) कौरयाणः । पाकस्थाना कौरयाणः ।

२०) काणुका । एकया प्रतिधा .... सोमस्य काणुका ।

२१) दीधितयः । अग्निं नरः .... गृहपतिमथर्युम् ।

२२) श्वघ्नी । कृतं न स्वघ्नी विचिनोति देवने ।
ऊर्मिः । ऊर्मिर्न नावमावधीत् ।

२३) किमीदिनः । इन्द्रा सौमा ..... किमीदिने ।
क्रव्यादः । चरुः ।

२४) रास्पिनः । रास्पिन स्यायोः ।

२५) अध्रिगुः । तुभ्यं श्चोद्यन्त्यध्रिगो शचीवः ।

२६) आङ्गूषः । एनाङ्गूषेण वयमिन्द्रवन्तः ।
२७) उर्वशी । उतासि मैत्रावरुणः .... पुष्करे त्वाददन्त ।
२८) निष्पपी । मा नो मघेव निष्पपी परादाः ।
२९) ऋञ्जतिः । आ व ऋञ्जस ऊर्जा व्युष्टिषु ।
३०) असामि ।असाम्योजो बिभृथा सुदानवः ।
३१) बकुरः । यवं वृकेणाश्विना .... ज्योतिश्चक्रथुरार्याय ।
३२) लिबुजा । बतो बतासि .... लिबुजेव वृक्षम् ।
३३) तूर्णाशम् । तूर्णाशं न गिरेरधि ।
निचुम्पुणः । पत्नीवन्तः सुता .... निचुम्पुणः ।
३४) पादुः । आविः स्वः .... न मुच्यते ।
वृकः । अरुणो मासकृद् .... अस्य रोदसी ।
३५) कृत्तिवासाः । अवततधन्वा पिनाकावसः कृत्तिवासा ।
काकुदम् । सुदेवो असि ...... सुशिरामिव ।
३६) आशुशुक्षणिः । त्वमग्ने .... नृपते जायसे शुचिः ।
३७) काशिः । इमे चिदिन्द्र .... मघवन् काशिरित्ते ।
३८) मूलम् । उद्वृह रक्षः ...... त पुषिं हेतिमस्य ।
पुलुकामः । पुलुकामो हि मर्त्यः ।
३९) जूर्णिः । क्षिप्ता जूर्णिर्न वक्षति ।
रुजानाः । संरुजानाः पिपिष इन्द्रशत्रुः ।
४०) उपलप्रक्षिणी । कारुरहम् ...... परिस्त्रवः ।
४१) पाथः । श्येनो न दीयन्नत्येति पाथः ।
ओजः । श्रायन्त इव .... प्रतिभागं न दीधिम ।।
४२) पाजः । कृणुष्व पाजः .... रक्षसस्तपिष्ठैः ।
४३) दुर्णामा । यस्ते गर्भ ममीवादुर्णामायोनिमासये ।
अप्वा । अप्वे परेहि ।
४४) गिर्वणाः । जुष्टं गिर्वणे बृहत् ।
सृपः । सृपकरस्न भूतये ।

४५) जवारु । अग्नेरूप आरूपितं जवारु ।

भृमिः । भृमिरस्यृषिकृन्मर्त्यानाम् ।

४६) अमत्र । महाँ अमत्रो वृजने विरप्सि ।

काणः । अरायि काणे विकटे गिरिं गच्छ सदान्वे ।

४७) तुविक्षम् । तुविक्षं ते ...... चिदृहु वृधा ।

उल्बम् । महदुल्बं स्थविरं तदासीत् ।

वाताप्यम् । पुनानो वाताप्यं विश्वश्चन्द्रम् ।

४८) भूर्णिम् । भूर्णिं मृगम् ...... न याचिषम् ।

आशीः । इन्द्राय गाव आशिरम् ।

४९) सललूकम् । आ कीतवः सललूकं चकर्थ ब्रह्मद्विषे तपुंषि हेतिमस्य।

जज्झती । मरुतो जज्झतीरिव ।

५०) सुरुधः । ऋतस्य हि सुरुधः सन्ति पूर्वीः ।

सुदत्रः । त्वष्टा सुदत्रो विदधातु रायः ।

बलः । अलातृणः .... पुरुहूतं धमन्ती ।

बजः ।

ग) **प्रकरणे**

१) दैवतकाण्डस्य सारांशः

२) दैवतकाण्डस्य सार्थकत्वम्

३) अनादिष्टदैवतमन्त्रेषु देवतोपपरीक्षा

४) ऋचां त्रैविध्यम्

५) त्रिविधर्चोदाहरणपूर्वकमर्थबोधनम्

६) त्रिदेवतावादः

७) भक्तिसाहचर्यम्

८) देवतानामाकारचिन्तनम्

९) सूक्तभाजः, हविर्भाजः, ऋग्भाजः, निपातभाजश्च देवाः ?

१०) देवतानां स्थान-निरूपणम् ।

निम्नाङ्कितशब्दार्थ-निर्वचनपूर्वकं मन्त्रव्याख्यानम्

११) अग्निः । अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातम् ।
अग्निः पूर्वेभिः .... सह वक्षति ।

१२) समनसः । अभि प्रवन्त .... जातवेदाः ।

१३) सुपर्णः । इन्द्रं मित्रम् .... मातरिश्वानमाहुः ।
गरुत्मान् ।

१४) जातवेदाः । जातवेदसे सुनवाम .... दुरितात्यग्निः ।

१५) वैश्वानरः । वैश्वानरस्य सुमतौ .... यतते सूर्येण ।

१६) जातवेद-वैश्वानर-शब्दार्थचिन्तनप्रसङ्गे पूर्वोत्तरपक्षः ।

१७) वृत्रहणम् । प्र नू महित्वम् .... अव शम्बरं भेत् ।

१८) हरयः । कृष्णं नियानम् ...... पृथिवी व्युद्यते ।

१९) जिन्वति । समानमेतत् .... जिन्वन्त्यग्नयः ।

२०) हविष्पान्तम् । हविष्पान्तमजरम् ...... स्वधया पप्रथन्तम् ।

२१) मातरिश्वा । अपामुपस्थे .... मातरिश्वा परावतः ।

२२) सुविदत्रम् । पूषात्वेतः .... सुविदत्रियेभ्यः ।

२३) मूर्धा । मूर्धा भुवः ...... चरति प्रजानन् ।

२४) स्तोमः । स्तोमेन हि .... पचति विश्वरूपाः ।

२५) चरिष्णू । यदेदेन .... भुवनानि विश्वा ।

२६) सधमादम् । यत्रा वदेते .... इदं विवोचत् ।

२७) सुपर्ण्यः । यावन्मात्र .... होतुरवरो निषीदन् ।

निम्नाङ्कितशब्दार्थ-निर्वचनमात्रम्

२८) मन्त्रः । छन्दः । यजुः । देवः । पिपीलिका ।।

२९) साम । गायत्री । उष्णिक् । जुष्टम् । दिव्यः ।

३०) ककुप् । बृहती । पङ्क्तिः । आदितेयम् । त्रिष्टुब् । जगती ।
त्रिराट् । मिथुनौ ।।

प्रथमाध्याये प्रथमवल्याम्

१) वाजश्रवनचिकेतसंवादप्रसङ्गः (मं. ४-६)
२) नचिकेतसे यमराजद्वारा वरत्रयदानम्(मं. १०-१६, २०-२१)
३) नचिकेताग्निचयनफलम् (मं. १७-१९)

तत्रैव द्वितीयवल्याम्

४) श्रेयः प्रेयोमार्ग-विवेकः (मं. १-४)
५) कर्मफलानित्यत्वम् (मं. १०)
६) अविद्याग्रस्तानामवस्था (मं. ५-६)
७) नचिकेतत्याग-प्रशंसा (मं. ११)
८) आत्मज्ञान-फलम् (मं. १२-१३)
९) ओङ्काररूपात्मोपदेशः (मं. १५-१७)
१०) आत्मस्वरूपचिन्तनम् (मं. १८-२२)
११) आत्मज्ञानानधिकारी (मं. २४-२५)

तत्रैव तृतीयवल्याम्

१२) प्राप्तप्राप्तव्यभेदेनात्मनो द्वैविध्यम् (मं. १-२)
१३) शरीरादिना सह संबद्धरथादिरूपकप्रसङ्गः (मं. ३-४)
१४) अविवेकिनामवस्था (मं. ५-७)
१५) विवेकिनः परमपदप्राप्तिप्रसङ्गः (म.. ८-९)
१६) इन्द्रियादीनां स्थितिः (मं. १०-११)
१७) लयचिन्तनम् (मं. १३)
१८) निर्विशेषात्मज्ञानेनामरत्वप्राप्तिः (मं. १५)
१९) बहिर्मुखेन्द्रियादिद्वारा आत्मदर्शने बाधा (मं. १)

द्वितीयाध्याये प्रथमवल्याम्

२०) विवेक्यविवेकिनामन्तरम् (मं. २)
२१) आत्मज्ञानेन निर्भयत्वम् (मं. ५)
२२) आत्मज्ञान-फलम् (मं. ३-७)

२३) सर्वत्रैव ब्रह्मदृष्टिः (मं.९)

२४) हृत्पुण्डरिकस्थं ब्रह्म (मं. १२-१३)

तत्रैव द्वितीयवल्याम्

२५) मरणोत्तरकाले जीवगतिः (मं. ६-७)
गुह्यब्रह्मोपदेशः (मं. ८)

२६) आत्मदर्शिनो गुणाः (मं. १२-१४)

२७) संसाररूपाश्वत्थवृक्षः (मं. १)
ईश्वरज्ञानेनामरत्वञ्च (मं. २, १४- १६)

२८) ब्रह्मज्ञानेन विना नामरत्वम् (मं. ४)
आत्मज्ञान-प्रकारस्तत्प्रयोजनञ्च (मं. ६-९)

२९) उत्तमावस्था (मं. १०-११)

३०) आत्मज्ञानसाधनं सद्बुद्धिरेव (मं. १२-१३)
कठोपनिषच्छान्तिपाठार्थः (मं. १९)

ङ) प्रकरणे

१) सर्वत्रेश्वरदृष्टिः (मं. १)

२) निष्कामकर्मोपासना (मं. २)

३) अज्ञान-निन्दा (मं. ३)

४) आत्म-स्वरूपम् (मं. ४-५)

५) अभेददर्शिनः स्थितिः (मं. ६)

६) अभेददर्शिनामवस्था (मं. ७)

७) आत्म-निरूपणम् (मं. ८)

८) कर्मोपासनासमुच्चयः (मं. ९)

९) कर्मोपासनासमुच्चयप्रकाराः (मं. १०)

१०) कर्मोपासनासमुच्चयफलम् (मं. ११)

११) व्यक्ताव्यक्तोपासनाफलम् (मं. १२-१४)

१२) उपासकमार्गयाञ्चाप्रकारः (मं. १५)

१३) उपासकमार्गयाञ्चा (मं. १६)

१४) मरणोन्मुखोपासकप्रार्थना (मं. १७-१८)

१५) "ॐ पूर्णमदः" इतीशावास्योपनिषच्छान्तिपाठार्थः ।

पाठ्यग्रन्थाः

१. यास्कीयं निरुक्तम् (४-७) अध्यायान्तम्

२. कठोपनिषद् (शाङ्करभाष्योपेता)

३. ईशोपनिषद् (शङ्करोव्वटमहीधरभाष्योपेता)

सन्दर्भग्रन्थाः

१. इशादि नौ उपनिषद् ।
(ईश, केन, कठ, मुण्डक, प्रश्न, माण्डूक्य, ऐतरेय, बृहदारण्यक, तैत्तिरीय, श्वेताश्वतर उपनिषद्) - अनुवादकः - माधवप्रसाद देवकोटा, नेपाल राजकीय प्रज्ञा प्रतिष्ठान, कमलादी, प्रथम-संस्करण वि.सं. २०३०

२. निरुक्तम्-दुर्गाचार्योमाशङ्करऋषिप्रणीत-टीकापादटिप्पणीविशिष्टभूमिकादिभिः समेतम् (४-७) अध्यायान्तम् ।

३. छज्जूराम संपादितं निरुक्तम् (चौखम्बा, बनारस)

४. ईशोपनिषद् (शाङ्करभाष्योपेता) गीताप्रेस, गोरखपुर ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

<table>
<tr><th rowspan="2">प्रकरणानि</th><th rowspan="2" colspan="2">प्रश्नप्रकाराः</th><th colspan="2">प्रश्नसङ्ख्याः</th><th rowspan="2">अङ्काः</th></tr>
<tr><th>प्रष्टव्याः</th><th>समाधेयाः</th></tr>
<tr><td></td><td rowspan="3">निबन्धात्मकेषु</td><td>विवेचनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>तुलनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>व्याख्यात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td colspan="2">सङ्क्षिप्तोत्तरापेक्षिणः</td><td>६</td><td>४</td><td>४०</td></tr>
<tr><td colspan="3">योगः</td><td>१२</td><td>७</td><td>१००</td></tr>
</table>

पत्रम् - चतुर्थम्

पाठ्यांशनाम - ब्राह्मणाध्ययनम्

पाठ्यांशस्योद्देश्यम्

१. ब्राह्मणग्रन्थविषयकं पाण्डित्यार्जनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	दर्शपूर्णमासेष्टिमन्त्रव्याख्यानम्	३६	२०
ख	ब्राह्मणानां सावणीयं भाष्यालोचनम्	३६	२०
ग	दर्शपूर्णमासविधिपरिज्ञानम्	३६	२०
घ	निरुक्तपरिशिष्टोक्तानां ऋचां व्याख्यानम्	३६	२०
ङ	निर्वचनविधिः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

सामिधेनी - निगदानुवचनम्, शान्तिकर्म, आधारः, अग्नि-सम्मार्जनञ्च ।

ख) प्रकरणे

होतृप्रवरणम्, स्वस्त्ययनजपः प्रयाजविषयाश्च ।

ग) प्रकरणे

आवापसम्बन्धीन्याख्यानानि दर्शपूर्णमासोपचारश्च ।

घ) प्रकरणे

सान्नाय्यसम्पादनम्, अवदानक्लृप्तिः, हवनक्लृप्तिः, दर्शपूर्ण-मासार्थाख्यानञ्च, स्विष्टकृदाहुतिः, प्राशित्रहरणमिडाकर्म च ।

ङ) प्रकरणे

१. मनुमतस्याख्यानम्, अनुयाजः, सूक्तवाकशंयुवाकौ ।

२. पत्नीसंयाजः, समिष्टयजुः, विष्णुक्रमः, वाग्विसर्गश्च ।

३. शतपथब्राह्मणविषयवैशिष्ट्यप्रतिपादनम्, वेदशाखाभाष्यादिनिरूपणञ्च ।

४. यास्कीयनिरुक्ते त्रयोदश-चतुर्दशाध्यायानुशीलनम् ।

पाठ्यग्रन्थाः

१. शतपथब्राह्मणम्, सायणभाष्यसहितम् (प्रथमकाण्डस्य ४-९ अध्यायाः)

२. शतपथब्राह्मणस्य भूमिका - श्रीधर-दीनानाथशर्म्मकृता

३. निरुक्तपरिशिष्टम्

सन्दर्भपुस्तकानि

१. शतपथब्राह्मणम् (मूलमात्रम्), अच्युतग्रन्थमाला, काशी ।

२. शतपथब्राह्मणं सभाष्यम्, नागप्रकाशनम्, दिल्ली ।

३. शतपथब्राह्मण (हिन्दी अनुवाद) -गङ्गाप्रसाद उपाध्याय ।

४. यास्कीयं निरुक्तम् (दुर्गवृत्तिसहितम्) खेमराजश्रीकृष्णदास-प्रकाशनम्, मुम्बई

५. निरुक्तम् (मुकुन्दझावक्शीप्रणीतटीकोपेतम्) ।

६. निरुक्तम् (हिन्दी-अनुवादसहितम्) पं. छज्जूराम शास्त्री, मेहरचन्दलक्ष्मणदास, दिल्ली ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

<table>
<tr><th rowspan="2">प्रकरणानि</th><th rowspan="2" colspan="2">प्रश्नप्रकाराः</th><th colspan="2">प्रश्नसङ्ख्याः</th><th rowspan="2">अङ्काः</th></tr>
<tr><th>प्रष्टव्याः</th><th>समाधेयाः</th></tr>
<tr><td></td><td rowspan="3">निबन्धात्मकेषु</td><td>विवेचनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>तुलनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>व्याख्यात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td colspan="2">सङ्क्षिप्तोत्तरापेक्षिणः</td><td>६</td><td>४</td><td>४०</td></tr>
<tr><td colspan="3">योगः</td><td>१२</td><td>७</td><td>१००</td></tr>
</table>

पत्रम् - पञ्चमम्

पाठ्यांशनाम - वेदपदार्थानुसन्धानम्

पाठ्यांशस्योद्देश्यम्

१. वैदिक-यज्ञमर्यादावबोधनम्
२. वेदलक्षणप्रमाणावबोधनम्
३. वेदमन्त्रार्थावबोधनम्
४. विधिभेद-वेदापौरुषेयतादिज्ञापनम्
५. मन्त्रब्राह्मणस्वरूपावबोधनम्
६. वेदाङ्ग-प्रयोजनादिज्ञापनम्
७. वेदव्याख्यापद्धतिज्ञापनम्
८. नामाख्यातोपसर्गादिलक्षणावबोधनम्
९. श्रौतस्मार्त-क्रियावबोधनम्
१०. शोधपद्धत्यवबोधनम्।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	ऋग्वेदभाष्यभूमिका (सायणाभिमता)	१८	१०
ख	ऋग्वेदादिभाष्यभूमिका (दयानन्दाभिमता)	१८	१०
ग	यजुर्वेदभाष्यभूमिका (उव्वटमहीधराभिमता)	१८	१०
घ	कल्पशास्त्रभूमिका (विद्याधराभिमता)	३६	२०
ङ	अनुसन्धानपद्धतिः	९०	५०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

सायणाचार्यकृत- ऋग्वेदभाष्यभूमिकाया निम्नाङ्किताः विषयाः

१. ऋग्यजुषोः श्रेष्ठताविवेकः
२. वेदसत्ता

३. वेदव्याख्यानयोग्यता
४. वेदमन्त्रार्थवत्त्वम्
५. परिसङ्ख्याविधिः
६. विध्यर्थवादभागयोः प्रामाण्यम्
७. वेदापौरुषेयत्वम्
८. मन्त्रब्राह्मणस्वरूपम्
९. मन्त्रभागभेदाः
१०. स्वाध्यायस्य दृष्टादृष्टफलवत्ता
११. अक्षर-प्राप्त्यर्थावबोध- वेदार्थज्ञानप्रसङ्गाः
१२. वेदानुबन्धचतुष्टयम् ।
१३. वेदाङ्गप्रयोजनानि ।
१४. पुराणादिशास्त्रप्रयोजनानि
१५. ब्रह्मविद्यासंवादः

ख) प्रकरणे

दयानन्दकृताया ऋग्वेदादिभाष्यभूमिकाया अधोऽङ्किताविषयाः-

१. वेदोत्पत्तिः
२. वेदनित्यत्वम्
३. विज्ञानकाण्डविषयः
४. यज्ञविषयः
५. देवताविषयः
६. मोक्षमूलरमतखण्डनम्
७. वेदसंज्ञाविचारः
८. वेदोक्तधर्मविषयः
९. पुरुषसूक्तव्याख्याविषयः ।
१०. पृथिव्यादिलोकभ्रमणविद्याविषयः
११. आकर्षणानुकर्षणविषयः
१२. गणितविद्याविषयः
१३. प्रार्थनोपासनामुक्तिविषयाः

१४. नौविमानादिविषयः ।

१५. पुनर्जन्मविषयः ।

ग) प्रकरणे

शुक्लयजुर्वेदसंहिताया उव्वटमहीधरभाष्यभूमिकयोर्निम्नाङ्किता अंशाः -

१. ऋषि-पदव्युत्पत्तिजन्मकल्पपूर्वकल्पवेदस्मरणविषयः ।

२. शाखादेर्देवतात्वविषयः ।

३. नामाख्यातोपसर्गनिपाताः ।

४. वाक्यार्थविषयः ।

५. वेदव्याख्याधर्माः

६. वेदशाखापरम्परा ।

७. वाजसनेयपदार्थः ।

८. स्वाध्यायपदार्थः

९. ऋषि-देवता-छन्द-विनियोगज्ञानसरणिः ।

१०. ऋग्यजुःसामवेदानां साधारणलक्षणानि ।

११. यज्ञविभागाः ।

१२. दर्शपूर्णमासयज्ञदेवतर्षिविषयः

१३. प्रकृति-विकृतियज्ञाः ।

१४. छन्दोविचारः ।

१५. दर्शपौर्णमासमन्त्राणामादावुपदेशहेतुश्चेति ।

घ) प्रकरणे

कात्यायनश्रौतसूत्र-भाष्यस्य विद्याधर-कृतायाः सरलाभूमिकाया निम्नाङ्किता अंशाः -

१. वेदपदार्थः

२. शाखापदार्थः

३. वेदापौरुषेयत्वम्

४. कात्यायन-परिचयः

५. वेदत्रयीत्वे चतुष्ट्वे चोपपत्तिः

६. यज्ञ-विभागाः
७. सोमयागपरिचयः
८. दर्शपौर्णमासयोः प्रधानद्रव्यदेवता
९. अग्निभेदो यज्ञपात्र-परिचयश्च
१०. स्मार्ताग्न्याधानम्
११. श्रौताधानम्
१२. दर्शपौर्णमासपदार्थक्रमः
१३. पिण्डपितृयज्ञः
१४. निरूढपशुबन्धपरिचयः
१५. सरला-भूमिकायाः पदार्थक्रमः

ङ) प्रकरणे

अनुसन्धानपद्धतौ निम्नाङ्किता विषयाः -

१. शोधकार्य-परिचयः
२. शोधकार्यस्य वैशिष्ट्यम्
३. शोधप्रस्तावः
४. शोध-प्रबन्धयोजना
५. टिप्पणीसन्निवेशनप्रकारः ।
६. शोधप्रबन्धे पादटिप्पण्याः स्थानम् ।
७. पादटिप्पणीषु ग्रन्थादिसन्निवेशप्रकारः ।
८. सन्दर्भग्रन्थविभागः ।
९. सन्दर्भग्रन्थविवरणप्रकारः ।
१०. अध्यायखण्डादियोजना ।
११. उदाहरणसमुद्धरणप्रकारः ।
१२. सङ्क्षेपपद्धतिः सङ्केतसूचिसन्निवेशश्च ।
१३. तालिकाचित्रावली-प्रश्नोत्तर-प्रपत्रादियोजना
१४. प्रबन्धयोजनाया अवान्तरविभागेषु पारस्परिकसम्बन्धो विशेषता च ।
१५. उपसंहारभागः

१६. परिशिष्टम्
१७. पृष्ठाङ्कनम्
१८. संशोधनम्
१९. टंकणविधिविशेषता च
२०. अन्तिमे समायोजनम्
२१. संस्तुतिः
२२. आबन्धनम् ।
२३. प्रस्तुतिः
२४. वाक्परीक्षा

पाठ्यग्रन्थाः

१. ऋग्वेदभाष्यभूमिका - सायणाचार्यः, चौखम्बाः, बनारस
२. ऋग्वेदादिभाष्यभूमिका - स्वामी दयानन्दः, दयानन्दाश्रम, अजमेर ।
३. शुक्लयजुर्वेदसंहिताभाष्यभूमिके - उव्वटमहीधरौ, मोतीलाल-बनारसीदास, बनारस ।
४. सरलाभूमिका - पं. विद्याधरगौडः, बनारस ।
५. शोधप्रबन्धप्रस्तुतीकरणको रूपरेखा - अनुसन्धानपरिषद्, म.सं.वि., दाङ्ग ।

सन्दर्भग्रन्थाः

१. कात्यायनश्रौतसूत्र-भूमिका - मण्डनमिश्रः, शोधसंस्थान-दिल्ली ।
२. शतपथब्राह्मणस्य भूमिका - दिनानाथश्रीधरकृताः, निर्णयसागर, मुम्बई ।
३. यज्ञतत्त्वप्रकाशः - म.म.चिन्नस्वामी, मोतीलाल, बनारस ।
४. अनुसन्धानपद्धतिः - वागीश शास्त्री, सं.सं.वि., बनारस
५. अनुसन्धानपद्धतिः - हरिप्रसाद-स्थानेश्वरौ, म.सं.वि., दाङ्ग ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

<table>
<tr><th rowspan="2">प्रकरणानि</th><th rowspan="2" colspan="2">प्रश्नप्रकाराः</th><th colspan="2">प्रश्नसङ्ख्याः</th><th rowspan="2">अङ्काः</th></tr>
<tr><th>प्रष्टव्याः</th><th>समाधेयाः</th></tr>
<tr><td></td><td rowspan="3">निबन्धात्मकेषु</td><td>विवेचनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>तुलनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>व्याख्यात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td colspan="2">सङ्क्षिप्तोत्तरापेक्षिणः</td><td>६</td><td>४</td><td>४०</td></tr>
<tr><td colspan="3">योगः</td><td>१२</td><td>७</td><td>१००</td></tr>
</table>

नव्यव्याकरणम्

स्तरगतविषयशिक्षणोद्देश्यम्

१. मतान्तरनिरसनपूर्वकं प्रयोगप्रक्रियायां, सूत्रार्थपरिष्कारे भाषाविज्ञाने च नव्य-वैयाकरणमतज्ञानं तद्विश्लेषणसामर्थ्योत्पादनम् ।

२. अर्थग्रन्थाध्ययनेन प्रकृतिप्रत्ययाद्यर्थज्ञान- तद्विश्लेषणक्षमतोत्पादनम् ।

३. भेदाभेदान्वयबोधस्तद्विश्लेषणसामर्थ्योत्पादनम् ।

४. ऊहापोहाभ्यां पाणिनीयसूत्रार्थापन-सूत्रपदकृत्यज्ञानपूर्वकं व्याकरणस्य दर्शनत्वसम्पादकपतञ्जलिमतावबोधः ।

५. शोधपद्धतिज्ञानं तत्प्रयोगपाटवोत्पादनं शब्दस्य शब्दब्रह्मस्वरूपत्वज्ञानम्, अधीतेषु समानप्रकृतिकेषु विषयेषु तुलनात्मकसामर्थ्योत्पादनम्, स्वशास्त्रेतिहासज्ञानतल्लेखनसामर्थ्योत्पादनम्, शब्दव्युत्पत्तिवर्धनञ्च ।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	प्रयोगप्रक्रिया, सूत्रार्थपरिष्कारः, पक्किकासु नागेशमतावबोधश्च	१००	४०%
द्वितीयपत्रम्	अर्थग्रन्थाध्ययनम्	१००	४०%
तृतीयपत्रम्	पतञ्जलिसिद्धान्तः	१००	४०%
चतुर्थपत्रम्	अर्थग्रन्थाध्ययने गदाधरमतानुशीलनम्	१००	४०%
पञ्चमपत्रम्	व्याकरणदर्शनम्, शोधपद्धतिश्च	१००	४०%

पत्रम् - प्रथमम्

पाठ्यांशनाम- प्रयोगप्रक्रिया, सूत्रार्थपरिष्कारः, फक्किकासु नागेशमतावबोधश्च।

पाठ्यांशस्योद्देश्यम्

१. प्रयोगाणां परिष्कृतप्रक्रियाज्ञानम् ।

२. सूत्राणां निर्दुष्टार्थज्ञानम् ।

३. सूत्राणां नियम्यनियामकभावादिज्ञानोत्पादनम् ।

४. प्रयोग-प्रक्रिया-सूत्रार्थ-फक्किकासु प्राचीनमतज्ञानपूर्वकं तस्यौचित्यानौचित्यस्थापनञ्च ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	संज्ञापरिभाषानिरूपणम्	५४	३०
ख	अच्सन्धिप्रकृतिभावसन्धिनिरूपणम्	५४	३०
ग	हल्सन्धितत्प्रतिपादकसूत्रव्याख्यानम्	३६	२०
घ	विसर्ग-स्वादिसन्धिव्याख्यानम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

प्रकृतग्रन्थस्य सिद्धान्तकौमुद्या व्याख्याग्रन्थत्वप्रतिपादनम् प्रकृत-ग्रन्थमङ्गलश्लोकार्थज्ञापनम्, मनोरमोमार्धदेहपदार्थप्रतिपादनम्, प्रकृत ग्रन्थस्यानुबन्धचतुष्टयज्ञानम् । अइउणित्यादीनां संज्ञासूत्रत्वोपपादनम्, तत्र संहिताकार्याभावे मतान्तरनिरसनपूर्वकं स्वमतोपस्थापनम्, सामर्थ्य-योगान्नहि किञ्चिदत्र, इत्यादिभाष्यवचनस्य' नृत्तावसाने नटराजराजो .... इत्यादिनन्दिकेश्वरकृतकाशिकायाञ्च प्रासङ्गिकत्वोपपादनम्, अनुबन्धानां सादित्वप्रतिपादनम्, सिद्धान्तकौमुद्युक्तरप्रत्याहारसिद्धिपूर्वकं शङ्कासमाधानाभ्यां लण्सूत्रस्थलकारघटकाकारस्यानुनासिकत्वखण्ड-नम्, रप्रत्याहारकार्यस्योपायान्तरसिद्धत्वप्रदर्शनम्, 'हलन्त्यमित्यस्य'

उपदेशेऽन्त्यं हलित्स्यादित्यर्थकरणे हेतुप्रदर्शनम्, 'उपदेशे इदन्त्यम् अच् अनुनासिक' इत्यादीनामन्योन्याश्रयदोषपरिहारोपायानामुपस्थापनं तत्खण्डनञ्च, "पूर्वं ह्यपवादा अभिनिविशन्ते", "प्रकल्प्य चापवाद-विषयमित्यादिन्यायतात्पर्यनिरूपणम्,

आदिरन्त्येन सहेता, हलन्त्यमित्यनयोः सपदकृत्यमर्थनिरूपणम्, अनुबन्धानामवयवानवयवत्वस्य प्रासङ्गिकत्वनिरूपणम्, उपदेशपदं भावञन्तमिति दीक्षितमतं व्याख्याय सविशदं नागेशमतनिरूपणम् 'अइउण्' इत्यादीनां क्रमबोधकत्वेनार्थवत्त्वात् प्रातिपदिकत्वनिरूपणम्, सपदकृत्यम् 'ऊकालोऽजिति' सूत्रार्थनिरूपणम्, 'तुल्यास्यप्रयत्नं सवर्ण-मित्यस्यार्थापनम्, तत्र यावदास्यभवतुल्यत्वनिरूपणम् कण्ठपदस्यार्थ-निरूपणम्, मतभेदेन कण्ठादीनां करणत्वोपपादनम्, ङादीनामुभयस्था-नत्वनिरूपणम्, दन्तोष्ठादीनां समुदितस्थानत्वनिरसनम्, विवृतत्व-व्याप्यानां सवर्णसंज्ञानुपयुक्तत्वनिरूपणम्, पूर्वत्रासिद्धमित्यस्याधिकारत्वे फलनिरूपणम्, अस्य शास्त्रासिद्धत्वप्रतिपादनपुरःसरं 'पूर्वत्र न' इति न्यासस्यायुक्तत्वप्रतिपादनम्, बाह्यप्रयत्ननिरूपणम् प्रसङ्गे वर्णाभिव्यक्ति-प्रकारबोधनम् 'ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इत्यस्य सिद्धि-सार्थक्यचिन्तनम्, अणुदित्सवर्णस्येति सूत्रस्य जातिव्यक्तिपक्षयोः सार्थक्यचिन्तनम्, तपरस्तत्कालस्येत्यस्य नियमार्थत्वविध्यर्थत्वयोः प्रतिपादनम्, वृद्धिरादैजित्यत्र तपरकरणसामर्थस्य चिन्तनम्, वृद्धि-पदस्य पदपरत्वनिर्वचनपुरःसरं संज्ञासूत्राणामपि विधित्वमिति शङ्का-समाधानाभ्यां निरूपणम् 'भूवादयो धातवः' इत्यस्यार्थापनं तत्पदकृत्य-निरूपणञ्च, निस्निरोर्दुस्दुरोश्च सान्तरान्तयोः फलप्रमाणनिरूपणम्, 'नवेति विभाषा' इत्यस्यार्थापनम्, तदनावश्यकत्वप्रतिपादनम् 'स्वरूपमित्यस्य सार्थक्यं प्रदर्श्य भाष्यरीत्या तदनावश्यकत्वप्रतिपादनम्।

येन विधिस्तदन्तस्य, परः सन्निकर्षः संहिता, सुप्तिङन्तं पदम्, हलोऽनन्तराः संयोग इत्येतेषां नागेशानुसारिव्याख्याननिरूपणम्। इको गुणवृद्धी इत्यस्यार्थापनम्, परिभाषाणामनुवादेऽपि प्रवृत्तिरिति प्रति-पादनम्, आद्यन्तौ टकितौ, मिदचोऽन्त्यात्परः, तस्मिन्निति निर्दिष्टे पूर्वस्य इत्येतेषु नागेशमतावबोधः, अनेकाल् सूत्रे शिद्ग्रहणसार्थक्यचिन्तनम्,

परनित्यान्तरङ्गापवादानामुत्तरोत्तरस्य बलवत्त्वे बीजोपस्थापनञ्च ।

ख) प्रकरणे

इको यणचीत्यत्र यथासङ्ख्येनापि निर्वाह इति व्याकरणस्य साध्वनुशासनत्वं शब्दनित्यतापक्षे इति च विचारः, स्थानिवदिति सूत्रस्य कीदृशातिदेशत्वमिति निर्धारणम्, तत्प्रयोजनप्रतिपादनम्, अनल्विधा-वित्यस्य प्राच्यनव्यमतेनार्थनिरूपणम्, अचः परस्मिन्नित्यत्र भावाभावाति देशत्वप्रतिपादनम्, पूर्वसम्बन्धिन्येव शास्त्रविधेयेऽनेन स्थानिवत्त्वमिति निरूपणम्, पूर्वविधिपदे तन्त्रत्वप्रतिपादनम्, न पदान्तेति सूत्रे विधिशब्दस्य भावसाधनत्वसाधनम्, अनेन पदचरमादिसाधकः प्रतिबन्धकश्च स्थानि-वद्भावो निषिध्यते इत्यस्य सविशदं निरूपणम् 'वान्तो यि प्रत्यये' इत्यस्य व्याख्यानम्, गव्यूतिरित्यत्र वलोपवारणोपायनिरूपणक्रमे नागेशमतोपस्थापनम्, 'लोपः शाकल्यस्येत्यस्य सपदकृत्यव्याख्यानम्, अण् प्रसज्यमान एव रपरो भवति पूर्वभक्तश्च रेफ इति मतोपपादनम्, अन्तादिवच्चेति सूत्रार्थापनम्, वर्णवृत्तिधर्मातिदेशोऽनेन नेति प्रतिपादनम्, स्थानिवद्भावेनास्याऽगतार्थत्वनिरूपणम्, ओमाङोश्चेत्यत्र एङीति नानुवर्त्तते इत्यस्य फलनिरूपणम् 'ॠति सर्वेण ॠ वा' 'ऌति सवर्णे ऌ वा' इति वार्त्तिकयोर्नागेशोक्त्यवधारणम्, अवङ् स्फोटायनस्य इत्यस्य व्यवस्थितविभाषात्वे फलनिरूपणम् ।

प्रत्यभिवादेऽशूद्रे, सम्बोधने चेत्यनयोर्नागेशमतावबोधः 'है-हेप्रयोगे हैहयोः' इत्यस्य नियामकत्वनिरूपणम्, 'अप्लुतवदुपस्थिते' इत्यत्र प्रसज्यत्वं पर्युदासत्वं वेति निर्धारणम्, ईचाक्रवर्मणस्येति सूत्रस्योभयत्र विभाषात्वखण्डनम् 'निपात एकाजनाङ्' इत्यत्र एकाच्पदे समासचिन्तनम्, तत्रैव एकग्रहणसार्थक्यनिरूपणम्, उञ इति सूत्रे उञ् निपात एवेति निश्चायनम्'ईदूतौ सप्तम्यर्थे' इत्यत्रार्थग्रहणसार्थक्यचिन्तनम् 'अणोऽप्रगृह्यस्येति सूत्रव्याख्यानञ्च विशेषेण प्राध्यापनीयानि ।

ग) प्रकरणे

स्तोः श्चुना श्चुरिति सूत्रव्याख्यानम्, चतुर्णामिति प्रयोगे रेफस्या-नुनासिकत्वाभावे दीक्षितोक्तिं प्रदश्र्य नागेशोक्तिप्रदर्शनम्, 'उदः

स्थास्तम्भोः पूर्वस्य' इत्यस्य सोदाहरणमर्थापनं प्रदर्श्य, उत्थानमित्यादौ 'झलो झलीत्यनेन सस्य लोपस्याशङ्कनम्, तत्परिहारश्च, यथासङ्ख्यसूत्र-व्याख्यानम् 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इत्यस्यार्थापनं प्रदर्श्य 'दण्डिनौ' इत्यत्र ङमुडभावोपायचिन्तनम् 'सं पुंकानां सो वक्तव्यः' इत्यस्यान्यथासिद्धत्वोपपादनम् 'छे च' इत्यस्यार्थापनविचारश्च ।

घ) प्रकरणे

'इणः षः' इति सूत्रव्याख्यानम्, 'द्विस्त्रिश्चतुरिति कृत्वोऽर्थे' इति सूत्रस्यार्थापनम्, तत्सार्थक्यचिन्तनम्, 'इसुसोः सामर्थ्ये' इति सूत्रस्य सोहापोहं व्याख्यानम्, स्वौजसमौडित्यत्र रुरेव पाठ्य इति लाघवमूलकस्य प्राचां व्याख्यानस्य दूषणम्, प्रथमयोः पूर्वसवर्णः इत्यस्यार्थापनपदकृत्य-निरूपणे, आगच्छ हे पयोऽट्, आगच्छ हे पयोऽद् इत्यादौ प्लुतसाधने नागेशोक्त्यवधारणम् 'भो भगो अघोऽपूर्वस्य' इति सूत्रे अश्ग्रहणस्य सार्थक्यं दीक्षितोक्त्या उपन्यस्य तत्र नागेशानभिमतत्वाभिधानम्, व्योर्लघु-प्रयत्नतरस्य' इत्यत्र य्योरित्यस्यौचित्येऽपि तथाऽकरणे हेतुचिन्तनम्, लघुप्रयत्नतरशब्दनिर्वचनम्, हलि सर्वेषामित्यनेन लघूच्चारणस्या-लघूच्चारणस्य च लोप इति निर्धारणम्, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यत्र ढ्रलोपपदस्य समासनिश्चयः, विप्रतिषेधे परं कार्यमित्यत्र विप्रति-षेधपदार्थनिर्वचनम्, परस्य बलवत्त्वे उदाहरणप्रतिपादनम्, अस्य नियमार्थत्वनिरूपणम्, लौकिकदृष्टान्तेनास्य विधित्वनिरूपणम्, परिभाषाया अप्यस्याः परिभाषान्तरनियामकत्वनिरूपणम्, एतत्तदोरित्यस्य 'सोऽचि लोपे' इत्यस्य च अर्थापनप्रकार- तत्फलनिरूपणञ्च विशेषेण अध्यापनीयानि ।

पाठ्यग्रन्थः

१. **लघुशब्देन्दुशेखरः** (प्रारम्भतः स्वादिसन्धिप्रकरणान्तः)

सन्दर्भग्रन्थाः

१. **सिद्धान्तकौमुदी** (तत्त्वबोधिनीसहिता) भट्टोजीदीक्षितरचिता
२. **प्रौढमनोरमा** (शब्दरत्नसहिता) भट्टोजीदीक्षितप्रणीता
३. **प्रक्रियाकौमुदी** (प्रक्रिया-प्रकाशसहिता) रामचन्द्राचार्यकृता।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - द्वितीयम्

पाठ्यांशनाम - अर्थग्रन्थाध्ययनम्

पाठ्यांशस्योद्देश्यम्

१. अस्य पत्रस्याध्ययनेन छात्राः परमतनिरसनपूर्वकं धात्वादि-प्रकृत्यर्थज्ञाने, सुप्तिङादिप्रत्ययार्थज्ञाने, तत्तलकारार्थज्ञाने, शक्तिस्वरूपज्ञाने, सभेदसमासशक्तिज्ञाने, निपातार्थावबोधने, स्फोटभेदज्ञानपूर्वकं तत्पदार्थज्ञाने च दक्षा भविष्यन्ति ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	धात्वर्थनिर्णयः	५४	३०
ख	लकारार्थनिर्णयतो नामार्थनिर्णयान्तम्	३६	२०
ग	समासशक्तिनिर्णयः	३६	२०
घ	नञर्थ निर्णयप्रकरणतः क्त्वाद्यर्थनिर्णयान्तम्	१८	१०
ङ	स्फोटनिर्णयः	३८	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

अत्र प्रकरणे विशेषेण फलव्यापारयोर्धात्वर्थत्वम्, तिङ आश्रयार्थत्वम्, तत्र प्राधान्याप्राधान्यविचारः, साध्यावस्थापन्नसिद्धावस्थापन्नक्रिययोः पार्थक्यविवेचनम्, धातूनां नानार्थतापत्तिपरिहारः, फलमात्रस्यैव धात्वर्थत्वमिति मतनिरासः, पश्य मृगो धावतीत्यादौ वाक्ये वाक्यभेदप्रसङ्गोदाहरणेन परमतनिरसनपूर्वकं व्यापारमुख्यविशेष्यकस्यैव शाब्दबोधत्वप्रतिपादनम्, ओदनं पचतीत्यादौ शाब्दबोधप्रकारः, कर्तृकर्मणोस्तिङर्थत्वे पचतीत्यादावुभयबोधापत्तेः कर्तृमात्रबोधापत्तेर्वा वारणम्। व्यापारस्य धात्वर्थत्वाभावे फलमात्रस्य च तत्त्वाभावे सविस्तरं दोषनिराकरणम्, धात्वर्थव्यापारस्याख्यातार्थत्वनिराकरणम्, धातुत्वस्य निर्वचनम्, सकर्मकत्वाकर्मकत्वनिर्वचनम् 'पाकः' इत्यादौ क्रियाद्वयबोधविवेचनम्, सम्बोधनान्तादीनां क्रियान्वयित्वे एव साधुत्वनिरूपणम्, भेद्यभेदकसम्बन्धेति भूषणकारिकायाः स्वमतोपसंहारानुबन्धिशिक्षणञ्च विधेयानि।

ख) प्रकरणे

आख्यातसामान्यार्थलकारविशेषार्थयोः सङ्गतिप्रदर्शनपूर्वकं लडर्थनिर्वचनम्, आत्माऽस्तीत्यादावारोपितस्य वर्त्तमानत्वस्य प्रतिपादनम्, ऊहापोहाभ्यां परोक्षत्वनिर्वचनपुरःसरं व्यातेने किरणावलीमुदयनः इत्यादीनां साधुत्वासधुत्वविचारः, परमतनिरसनपूर्वकमिष्टसाधनत्वस्यैव लिङर्थ (विध्यर्थ) त्वनिरूपणम्।

सुबर्थप्रतिपादिकाया "आश्रयोऽवधिरुद्देश्यः" इत्यादि भूषणकारिकायाः सम्यग् व्याख्यानम्, परमतखण्डनपूर्वकम्- 'चैत्रश्चैत्रं गच्छतीत्यादिप्रयोगवारणोपायप्रदर्शनम्, सोदाहरणं कर्मभेदशिक्षणम्, ऊहापोहाभ्यां कर्तृतृतीयाया आश्रयार्थकत्वनिरूपणम्, करणार्थत्वनिरूपणम्, सभेदं सोदाहरणञ्च पञ्चम्यर्थनिरूपणम्, सोदाहरणं सभेदञ्च चतुर्थ्यर्थव्याख्यानपूर्वकं रजकाय वस्त्रं ददातीत्यादौ मतभेदप्रदर्शनम्।

एकं द्विकं त्रिकञ्चेति भूषणकारिकायाश्छात्रमनोहारि ग्रन्थानुगामि च व्याख्यानम्, पुंस्त्वादिनिर्वचनपुरःसरं लिङ्गस्य शब्दनिष्ठत्व-तद्वाच्यत्वनिरूपणम्, पशुना यजेतेत्यादौ छाग्यादीनां ग्रहणवारणोपाय-शिक्षणम्, शब्दस्यापि नामार्थत्वसाधनम्, अनुकार्यानुकरणयोर्भिन्नत्वा-भिन्नत्वे फलभेदप्रदर्शनञ्च विशेषेण प्राध्यापनीयम् ।

ग) प्रकरणे

समासत्वनिर्वचन तद्भेदप्रदर्शनपूर्वकं तत्तत्समासलक्षणशिक्षणम्, जहत्स्वार्थाजहत्स्वार्थयोस्तद्भेदानाञ्च निरूपणम्, व्यपेक्षावादिनां मतानां सविस्तरमुपस्थापनं विधाय, एकार्थीभाववादिनां वाचोयुक्तिभिस्तत् खण्डननिरूपणम्, समासशक्तिस्वीकृतौ निषादस्थपत्यधिकरणसिद्धान्ता-ऽसिद्धिवारणशिक्षणम्, सविस्तरं सोहापोहञ्च शक्तिस्वरूपनिरूपणम्, सङ्केतस्यैव शक्तित्वनिराकरणम्, अपभ्रंशानां बोधकत्वप्रदर्शनपूर्वकं तेषां साधुत्वाभावनिरूपणम्, साधुत्वाऽसाधुत्वनिर्वचनम्, अपभ्रंशाः परम्परया वाचका इति मतनिरसनपूर्वकं साक्षादेव तेषां वाचकत्वमिति स्वमतप्रदर्शनम् ।

घ) प्रकरणे

आरोपितत्वस्य अभावत्वस्य च नञर्थत्वप्रतिपादनम्, 'तत्सा-दृश्यमभावश्चेति नञर्थमुदाहरतामभिप्रायप्रदर्शनम्, अत्वं भवसि, अनहं भवामीत्यादौ पुरुषवचनादिव्यवस्थोपपादनम्, निपातत्वनिर्वचनपुरःसरं प्रादयो द्योतकाश्चादयो वाचका इति निरस्य वैयाकरणमतस्थापनम्, साक्षात् क्रियते, अलङ्क्रियते इत्यादौ निपातानामपि द्योतकत्वनिरूपणम्, शरैरुस्रैरित्यादावन्वयोपपादनम्, अन्वयव्यतिरेकाभ्यां निपातानां वाचकत्वोपसंहारः, भावप्रत्ययस्य सम्बन्धार्थत्वनिरूपणम्, "साऽस्य देवता" इत्यादौ देवताविशिष्टं देयं प्रत्ययार्थ' इत्यादिनिरूपणम्, अग्न्यादिदेवस्य प्रकृत्यैव भानात् तद्धितस्य न देवतार्थत्वमिति प्रदेये द्रव्य एव तस्य शक्तिरिति निरूपणम्, समासादिवृत्तौ, अभेदैकत्वसंख्या-निरूपणम्, क्त्वाद्यर्थनिरूपणम् ।

ङ) प्रकरणे

स्फोटत्वनिर्वचनपुरःसरं तस्यैव वास्तविकत्वनिरूपणम्, स्फोटभेदनिरूपणं तेषु वाक्यस्फोटस्य मुख्यत्वप्रतिपादनम्, स्थानिनामादेशानां वा वाचकत्वमिति मुखेन सोहापोहं वर्णस्फोटसाधनम्, पदस्फोटाखण्डपदस्फोटप्रतिपादनम्, वाक्यस्फोटाखण्डवाक्यस्फोट-प्रतिपादनम्, स्फोटस्यैवाखण्डत्वमिति कैयटमतखण्डनम्, पदवाक्ययोरखण्डस्फोटयोरेव वाचकत्वे व्याकरणशास्त्रस्य प्रकृतिप्रत्ययाभ्यां पदव्युत्पादकस्य वैयर्थ्यनिराकरणम्, जातिस्फोटस्यावश्यकत्वप्रतिपादनम्, अखण्डजातिस्फोटस्य प्रतिपादनञ्च विशेषेण शिक्षणीयम् ।

पाठ्यग्रन्थः

१. **वैयाकरणभूषणसारः** (सम्पूर्णः) - कौण्डभट्टविरचितः

सन्दर्भग्रन्थौ

१. **परमलघुमञ्जूषा** - नागेशभट्टरचिता

२. **शब्दशक्तिप्रकाशिका** - जगदीशप्रणीता

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - तृतीयम्

पाठ्यांशनाम - पतञ्जलिसिद्धान्तः

पाठ्यांशस्योद्देश्यम् -

१. अस्य पत्रस्याऽध्ययनेन छात्राः पातञ्जलसिद्धान्तमनुसृत्य संवाद-शैल्या निर्दिष्टसूत्राणां तदन्तर्गतानां वार्तिकादीनाञ्च व्याख्यावबो-धपुरस्सरं महाभाष्यदिशा व्याकरणदर्शनपरिज्ञाने व्युत्पना भवन्ति।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	तृतीयचतुर्थाह्निकप्रकरणे	५४	३०
ख	पञ्चमाह्निके प्रगृह्यसंज्ञाप्रकरणम्	५४	३०
ग	पञ्चमाह्निके घुसंज्ञादिनिष्ठासंज्ञान्तप्रकरणम्	१८	१०
घ	षष्ठाह्निकप्रकरणम्	५४	३०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

३. तात्पर्यपरिशुद्धिः - उदयनाचार्यरचिता
४. तात्पर्यटीका - वाचस्पतिमिश्रप्रणीता
५. किरणावली - उदयनाचार्यविहिता
६. न्यायपरिशिष्टम् - उदयनाचार्यप्रणीतम्
७. तार्किकरक्षा - वरदराजकृता

८. न्यायकुसुमाञ्जलिः – उदयनाचार्यरचितः
९. न्यायलीलावती – वल्लभाचार्यकृता
१०. न्यायभूषणम् – भासर्वज्ञकृतम्
११. लक्षणावली – उदयनाचार्यकृता
१२. लक्षणमाला – उदयनाचार्यप्रणीता

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकं	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - चतुर्थम्

पाठ्यांशनाम - विवरणगतं प्रमेयम्

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	मङ्गलाचरणादिः	१८	१०
ख	श्रवणस्याङ्गित्वविचारादिः	३६	२०
ग	विचारस्य वेदान्तवाक्यविषयता	३६	२०
घ	अध्यासविचारः	५४	३०
ङ	अज्ञानसाधकप्रमाणादिः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

मङ्गलाचरणम्, ग्रन्थनिर्माणप्रयोजनम्, शास्त्राधिकारिविवेकः 'स्वाध्यायोध्येतव्यः' इत्यस्य विधिविचारोत्थाने नित्यविधित्वस्थापनम्, श्रवणस्याङ्गित्वसिद्धान्तः, तत्रैव पुराणादिसम्मतिश्च ।

ख) प्रकरणे

श्रवणमननादिलक्षणानि, श्रवणस्य नित्यविधित्वाक्षेपः, तत्खण्डनपूर्वकं नित्यविधित्वनिष्कर्षः, तत्रैव विध्यन्तरनिरासश्च ।

ग) प्रकरणे

विचारस्यावश्यकता, तत्रोपपत्तयः, ब्रह्मजिज्ञासापदसूचितविषय-निरूपणम्, ब्रह्मज्ञानजनकत्वान्यथानुपपत्या विचारस्य वेदान्तवाक्य-विषयत्वम्, फलत्वान्यथानुपपत्या ब्रह्मज्ञानस्य मोक्षसाधनत्वम्, जिज्ञासा-सूत्रस्य शास्त्रप्रवृत्तिहेतुत्वम्, तत्रैवानुमानादिकम्, बन्धस्यापि सूत्रसूचि-तत्वम्, अध्यासविचारोत्थापनम्, अध्यासे शङ्कासमाधी, तमोविचारः, तमसो भावरूपत्वञ्च ।

घ) प्रकरणे

अध्यासेऽनेकविधाक्षेपप्रदर्शनेन धर्मिणोर्धर्मयोर्धर्मधर्मिणोश्चा-ध्यासाभावोपपादनम्, अध्यासस्यावस्तुत्वन्तस्य सत्त्वञ्चानिर्वचनीयमिति निरूपणम्, तत्रैव पुनः प्रश्नोत्तरधारा, अध्यासस्यानादित्वम्, आत्मनः संसृष्टत्वरूपेणानात्मनस्तु स्वरूपेणाध्यास इति निरूपणम्, तादात्म्यैकत्व-योर्भेदः, एकत्वमध्यस्तमिति प्रतिपादनम्, अज्ञानमेवाध्यासोपादानमिति-निरूपणञ्च ।

ङ) प्रकरणे

प्रत्यक्षप्रमाणस्याज्ञानसाधकत्वम् 'सर्वं वस्तु ज्ञाततयाज्ञाततया वा साक्षिचैतन्यस्य विषयः' इत्युक्तेस्तात्पर्यप्रकाशनम्, विवरणोक्तस्या-ज्ञानसाधकानुमानस्य विवेचनम्, आवरणं फलतो न तु साक्षादिति स्थापनम्, आवरणस्वरूपम्, अनाद्यनिर्वचनीयमज्ञानं ब्रह्मण आवरणमिति

स्थापनञ्चेति ।

पाठ्यग्रन्थः

१. विवरणप्रमेयसङ्ग्रहः – आदित इत्ययमेव वेदान्तवादोऽति-निर्दोषत्वादादरणीय इत्यन्तः ।

सन्दर्भग्रन्थाः

१. पञ्चपादिकाविवरणम् ।
२. विवरणस्य तत्त्वदीपनम् ।
३. विवरणस्य ऋजुविमला ।
४. ब्रह्मविद्याभरणम् – अध्यासभाष्यम् ।
५. भामती – अध्यासभाष्यगता ।
६. भाष्यरत्नप्रभा – अध्यासभाष्यगता ।
७. न्यायनिर्णयः – अध्यासभाष्यवर्ती ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

<table>
<tr><th rowspan="2">प्रकरणानि</th><th rowspan="2" colspan="2">प्रश्नप्रकाराः</th><th colspan="2">प्रश्नसङ्ख्याः</th><th rowspan="2">अङ्काः</th></tr>
<tr><th>प्रष्टव्याः</th><th>समाधेयाः</th></tr>
<tr><td></td><td rowspan="3">निबन्धात्मकेषु</td><td>विवेचनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>तुलनात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td>व्याख्यात्मकाः</td><td>२</td><td>१</td><td>२०</td></tr>
<tr><td></td><td colspan="2">सङ्क्षिप्तोत्तरापेक्षिणः</td><td>६</td><td>४</td><td>४०</td></tr>
<tr><td colspan="3">योगः</td><td>१२</td><td>७</td><td>१००</td></tr>
</table>

पत्रम् - पञ्चमम्

पाठ्यांशनाम - विवरणगतमवशिष्टप्रमेयमनुसन्धानञ्च

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	कूटस्थचैतन्ये प्रपञ्चाध्यासः	३६	२०
ख	अध्यासतारतम्यम्	३६	२०
ग	श्रवणस्याङ्गित्वविचारादिः	१८	१०
घ	अनुसन्धानपूर्वाधारः	३६	२०
ङ	अनुसन्धानस्वरूपम्	५४	३०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

घटादीनामपरोक्षत्वम्, अनुमानादिज्ञानस्थापनम्, प्रत्यक्षविषयेष्वेवापरोक्षत्वनिरूपणम्, आपरोक्ष्यस्फुरणमात्रेणाधिष्ठानत्वनिर्वाहः, स्वप्रकाशत्वेनात्मापरोक्षः, स्वकाशत्वनिर्वचनम्, प्रत्यगात्मन्यनात्माध्याससंभावना, तत्रैव प्रमाणान्वेषणायां प्रत्यक्षानुमानार्थापत्त्यागमप्रमाणानीति निरूपणम्, तादात्म्याध्यासस्य व्यवहारहेतुत्वम्, प्रमाणानां पारमार्थिकतत्त्वावेदकत्वं व्यावहारिकतत्त्वावेदकत्वञ्च, विवेकिनामपि शास्त्रीयव्यवहार आध्यासिक इति निरूपणञ्च ।

ख) प्रकरणे

साक्षिचैतन्येऽन्तःकरणेन्द्रियदेहतद्बाह्यविषयाणां तद्धर्माणाञ्च क्रमेणाध्यासोपपादनम्, मनस अनुमानगम्यत्वनिरासेन साक्षिवेद्यत्वस्थापनम्, अन्तः करणादीत्यत्रादिशब्दार्थविचारः, अध्यासनिवृत्तिसंभवः, आनन्दावाप्तेः पृथगनिर्देश्यत्वम्, अस्थूलादिवाक्यतात्पर्यम्, निष्प्रपञ्चब्रह्मप्रमितावारोपितरूपाणामविरोधित्वोपपादनम्, आर्थिकार्थस्य निरपेक्षत्वम्, अध्यासनिवृत्तिः शास्त्रप्रयोजनमित्युपपादनम्, ब्रह्मविद्याप्राप्ति-

शब्दार्थविवरणञ्च ।

ग) प्रकरणे

श्रवणमनननिदिध्यासनानामङ्गाङ्गित्वविचारः, श्रवणस्यापातिकत्वभङ्गः उपास्यत्वेन विधीयमानानां गुणानां निर्विशेषब्रह्मप्रतिपत्तावुपयोगः, सर्वेषां वेदान्तानां ब्रह्मैव विषयस्तद्विद्याप्राप्त्याऽनर्थनिवृत्तिः प्रयोजनमिति प्रतिपादनम्, लिङर्थविचारादिः, विचारशास्त्रप्रयोजनं मोक्ष इति व्यवस्थापनम्, प्रथमसूत्रेण विषयप्रयोजने सूचित इति प्रदर्शनञ्च ।

घ) प्रकरणे

प्रकृतिप्रत्ययार्थादिनिर्देशपूर्वकमनुसन्धानत्वविवेकः, शोधानुसन्धानगवेषणादिशब्दानामर्थसमविषमतादिदिग्दर्शनम्, तत्र (रिसर्च) शब्दाभिधेयत्वस्य समन्वयप्रदर्शनम्, तेषु फलव्यापारादिवर्गीकरणम्, तद्व्यापारसंभावनावतोऽधिकारिता, विषयचयनप्रणाली, पूर्वाध्ययनस्थितिः, समस्योपस्थापनं प्राक्कल्पनादिकञ्च ।

ङ) प्रकरणे

अनुसन्धानप्रस्तावनिर्माणम्, शोधशीर्षकचयनम्, विषयचयनेऽवधारणीयता, शोधप्रबन्धस्य सामान्यरूपाकलनम्, निर्देशकविशेषज्ञादीनामावश्यकः परामर्शः, उपस्थापितसमस्यानां स्पष्टत्वोद्भावनम्, समस्यासमाधानविधौ शोधप्रबन्धस्योन्मुखता, शोधप्रबन्धे समावेशनीयानां विषयाणां सङ्गत्यनुसारिनिवेशनम्, विश्लेषणविधिना निवेशितविषयाणां सुबोधत्वसम्पादनम्, प्रामाणिकत्वाधानाय पादटिप्पण्यादिप्रदानम्, शोधप्रबन्धस्य प्रबन्धान्तरेणागतार्थत्वमपूर्वत्वञ्चेति निदर्शनम्, रहस्योद्घाटने स्वोपज्ञत्वप्रत्यायकताया अभिव्यक्तीकरणम्, उपसंहारोऽन्ते च सन्दर्भग्रन्थविवरणमिति ।

पाठ्यग्रन्थाः

१. विवरणप्रमेयसङ्ग्रहः – नन्वयमपिवादो दुष्ट एव इत्यतः प्रथमवर्णकसमाप्त्यन्तः ।

सन्दर्भग्रन्थाः

१. पञ्चपादिकाविवरणम्

२. विवरणस्य तत्त्वदीपनम्

३. विवरणस्य ऋजुविमला

४. ब्रह्मविद्याभरणम् – अध्यासभाष्यम्

५. भामती – अध्यासभाष्यगता

६. भाष्यरत्नप्रभा – अध्यासभाष्यगता

७. न्यायनिर्णयः – अध्यासभाष्यवर्ती

८. अनुसन्धानपद्धतिः – भागीरथप्रसादत्रिपाठी

९. अनुसन्धानप्रकाशः – हरिप्रसादाचार्यः स्थानेश्वरगौतमश्च

१०. अनुसन्धानप्रबन्धको रूप र शैली – चूडामणि बन्धु

११. प्राचीनभारतीयलिपिमाला (भूमिकाग्रलेखमात्रम्) – गौरीशङ्कर-हीराचन्द्र ओझा ।

१२. Style Manual, Edward Seefac.

१३. How to do Research ? - Collon Wood.

१४. A Manual for Writers of Termpaper Thesis and Dissertations - Junain Katel.

१५. Of Manual of Thesis Writing.

१६. Formand Style in Thesis Writing - Campbell Wilian Gibs.

१७. अनुसन्धानसम्बन्धिन्यः पत्रिकाः ।

१८. नवीनतमानि सम्बन्धितप्रकाशनानि ।

१९. विभिन्न विश्वविद्यालयसङ्गृहीताः शोधप्रबन्धाः ।

२०. विदुषां सम्बन्धितविशेषज्ञानां परामर्शविशेषादिकञ्च ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

प्राचीनन्यायवैशेषिकम्

स्तरगतविषयशिक्षणोद्देश्यम्

१. प्रमाणादिषोडशानां द्रव्यादिसप्तानाञ्च पदार्थानां विवेचनात्मक-ज्ञानोत्पादनम्।

२. गवेषणे, सूक्ष्मचिन्तने, विविधशास्त्रविवेचने च सामर्थ्योत्पादनम्।

३. दार्शनिकपद्धत्या परमाण्वादिजगद्वस्तुविश्लेषणसामर्थ्यो-त्पादनम्।

४. आत्मपरात्मास्तित्वविषयक-विवेचनात्मक-विशदज्ञानोत्पादनम्।

५. वैशेषिकदर्शननिहितभौतिकविज्ञान-रसायनविज्ञानादीनां सम्यग्-ज्ञानसम्पादनम्।

६. शास्त्रान्तराभ्यसनयोग्यतासमुपार्जनम्।

७. वेदादिशास्त्रान्तरसंरक्षणयोग्यतासम्पादनम्।

८. न्यायवैशेषिकदर्शनस्य विशेषज्ञरूपेण राष्ट्रस्य विविधक्षेत्रेषु कार्यकरणे योग्यतासम्पादनम्।

९. राष्ट्रस्य, धर्मस्य, संस्कृतेश्च संरक्षणे समुन्नतये च दक्षजनशक्ते-रुत्पादनम्।

१०. विविधविवादग्रस्तविषयेषु सयुक्ति निर्णयप्रदाने दक्षतासम्पादनञ्च।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	न्यायत्रिसूत्रीवार्तिकतात्पर्याख्यानम्	१००	४०
द्वितीयपत्रम्	न्यायसूत्रभाष्यव्याख्यानम्	१००	४०
तृतीयपत्रम्	सूत्रभाष्यव्याख्यानम्	१००	४०
चतुर्थपत्रम्	षट्पदार्थविवेचनम्	१००	४०
पञ्चमपत्रम्	सभूषणन्यायसारविषयविवेचनम्	१००	४०

पत्रम् - प्रथमम्

पाठ्यांशनाम- न्यायत्रिसूत्रीवार्तिकतात्पर्याख्यानम्

पाठ्यांशस्योद्देश्यम्

१. त्रिसूत्रीवार्तिकटीकान्तर्गतविविधविषयविवेचनक्षमतोत्पादनम्।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	प्रमाणन्यायसम्बद्धजिज्ञासोत्तरसारांश-साकल्यवर्णनम्	३६	२०
ख	प्रमाणाद्यवयवपर्यन्तपदार्थोद्देशलक्षणविचारः	१८	१०
ग	तर्कादिनिग्रहस्थानान्तपदार्थानां विवेचन-पूर्वकं पृथगभिधानविचारः	३६	२०
घ	मिथ्याज्ञाननाशाद्यपवर्गान्तशास्त्रार्थविचारः-प्रमाणविभागविचारश्च	३६	२०
ङ	प्राच्यनव्यन्याययोर्न्यायवैशेषिकयोश्च-साम्यवैषम्यसमीक्षणम्	५४	३०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

न्यायभाष्यस्याऽदिवाक्यस्योत्थाने बीजस्यानुसन्धानम्। पुरुष-श्रेयोऽभिधायकस्य न्यायशास्त्रस्य गौतमरचितस्य पञ्चाध्यायात्मकस्यैव न्यायशास्त्रकथनम्। वस्तुतत्त्वाऽन्वाख्यानात्मशास्त्रधर्माधिकारिणः प्रतिपाद्याः पुरुषाः के? तन्निर्वचनमाध्यमेनाऽनुबन्धचतुष्टयं कथं सूचितं भवतीति विचारः। एकविंशतिप्रभेदभिन्नदुःखानि कानि, तेषां कथं दुःखध्वंस इति विचारः। प्रवृत्तिद्वैविध्यविचारः। प्रमाणतोऽर्थ प्रतिपत्ति-प्रवृत्तिसामर्थ्ययोः मिथो हेतुहेतुमद्भावे परस्पराश्रयत्वेऽपि तस्या अबाध-कत्वकथनम्। परतः प्रामाण्यहेतूनामुपपादनपूर्वं स्वतः प्रामाण्यहेतूनां

निरसनम् । करणत्वविवेचनपूर्वकमुपलब्धिकरणत्वं प्रमाणस्य न प्रमात्रादेरिति विचारः । अर्थपदार्थविचारः । सदसतोरेकप्रमाणगम्यत्वविचारः। अपवर्गेऽशक्यविवेकहानयोः कयोरेव निवृत्तिकथनम् । प्रमेयविशेषतत्त्वज्ञानस्यैव निःश्रेयसो हेतुत्वकथनम् ।

ख) प्रकरणे

प्रमाणाद्यवयवपर्यन्तपदार्थोद्दिशविचारः । तत्त्वपदार्थनिर्णयः । प्रमेयपदार्थान्तर्गतानां संशयादीनां पृथग्ग्रहणविचारः । प्रयोजनस्य न्यायाश्रयत्वविचारः । न्यायपरमन्यायविचारः । प्रत्यक्षागमविरुद्धन्यायाभासविचारः । अनुमानोपमानविरुद्धाऽसंभवविचारः । दृष्टान्तसिद्धान्तयोः सप्रयोजनत्वेन पृथगुपदेशविचारः । अवयवलक्षणविचारः । प्रत्यक्षादिचतुर्णां प्रतिज्ञादिचतुर्षूपचारस्य तत्रैकवाक्याध्यारोपस्य च विचारः । चतुर्वर्गे एव प्रमाणस्य प्रधानत्वकथनञ्च ।

ग) प्रकरणे

तर्कस्याप्रमाणत्वादनावश्यकत्वशङ्कापरिहारः । निर्णयस्य प्रमाणफलभावोपपादनम् । वादजल्पवितण्डानां भेदविचारः । निग्रहस्थानान्तर्गतानां हेत्वाभासानां पुनः पृथग्ग्रहणतात्पर्यविचारः । छलजाति निग्रहस्थानानां स्वयमप्रयोज्यानामपि तल्लक्षणज्ञानस्य कथासूपयोगित्वदर्शनम् । न्यायविद्यायाः सर्वविद्याकर्मधर्माणां प्रदीपोपाश्रयत्वकथनम्। वादादिपरिज्ञानस्य रागहेतुत्वनिराकरणम् । अनेकशरीरैः प्रारब्धानां झटितिमोक्तुः शीघ्रमेव परामुक्तेः संभववर्णनम् । न्यायवैशेषिकमुक्ति सम्बन्ध्युपहासनिराकरणम् । दुःखात्यन्तोच्छेदेऽपि प्रवृत्तिदर्शनञ्च ।

घ) प्रकरणे

मिथ्याज्ञानदुःखान्तसंसारविचारः । विपर्ययस्याऽऽत्मख्यात्यादिरूपनिरसनपूर्वकमन्यथाख्यातिरूपनिष्कर्षविचारः । बीजनाशादङ्कुरानुत्पादवत् मिथ्याज्ञानादिबीजनाशादङ्कुरानुत्पादरूपप्रभाभावपरकाऽपवर्गोपपादनम् । परापरनिःश्रेयसयोः क्रमिकाऽक्रमिक-मुख्यामुख्य शास्त्रार्थत्वकथनम् । अपरनिःश्रेयसस्याऽत्यावश्यकप्रयोजनदर्शनम् । श्रवणादिजीवनमुत्त्यन्तप्रतिपत्तिचतुष्कवर्णनम् । आत्मनि नास्तीत्यादिमिथ्याज्ञानेषु सारूप्योपपादनविचारः । नैरात्म्यदृष्टेः प्रयत्नेनोच्छेदविचारः।

मिथ्याज्ञानतत्त्वज्ञानादिषु परबलीयस्त्वविचारः । मिथ्याज्ञानतत्त्वज्ञानयोर्विरोधपरिहारः ।

तत्त्वज्ञानस्य त्रिविधप्रवृत्तिसापेक्षत्ववर्णनम् । प्रमाणशब्दादेव प्रमाणसामान्यविशेषलक्षणसूचनविचारः । प्रमाणप्रमितिफलेष्वपेक्षाकृतहेतुफलभावविचारः । प्रत्यक्षादिक्रमप्रयोजनविचारः । प्रत्यक्षस्य सर्वज्येष्ठत्वोपपादनम् । प्रत्यक्षशब्दस्य व्युत्पत्तिप्रवृत्तिनिमित्तसमीक्षणम्। हानोपादानयोरनुमानगम्यत्वविचारः । प्रमाणसंप्लवविचारः । प्रमाणसंप्लवव्यवस्थयोर्गुणप्रधानभावविचारश्च ।

पाठ्यग्रन्थः

१. न्यायवार्तिकम्, त्रिसूत्रीपर्यन्तम् - वाचस्पतिमिश्रविरचित तात्पर्यटीकोपेतम् ।

सन्दर्भग्रन्थाः

१. न्यायतात्पर्यपरिशुद्धिः - उदयनाचार्यः

२. न्यायपरिचयः - फणीभूषण तर्कवागीशः

३. पदार्थीयं दिव्यचक्षुरित्यस्य भूमिकाभागः - रामेश्वरशर्मा

४. पदार्थशास्त्र - आनन्दझा

५. वैशेषिकदर्शन (तुलनात्मक अध्ययनं) - डा. वी.सिंह

६. वैशेषिकदर्शन एक अध्ययन - नारायण मिश्र

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - द्वितीयम्

पाठ्यांशनाम - न्यायसूत्रभाष्यव्याख्यानम् ।

पाठ्यांशस्योद्देश्यम्

१) प्रमाणानां चतुष्ट्वसिद्धिसामर्थ्योत्पादनम् ।

२) प्रमेयस्य द्वादशविधत्वसाधनदक्षतोत्पादनम् ।

३) संशयादिनिर्णयान्तपदार्थानां विश्लेषणयोग्यतासम्पादनम् ।

४) कथाप्रयोगसम्यग्ज्ञानसम्पादनम् ।

५) बौद्धनैयायिकाभिमतप्रमाणानां तुलनात्मकसमीक्षणे योग्यता-सम्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	प्रत्यक्षादिप्रमाणचतुष्टपरिज्ञानम्	३६	२०
ख	द्वादशविधप्रमेयपरिज्ञानम्	३६	२०
ग	संशयादिनिर्णयान्तपदार्थनिरूपणम्	३६	२०
घ	वादादिपदार्थनिरूपणम्	३६	२०
ङ	बौद्धनैयायिकाभिमतप्रमाणानां - तुलनात्मकसमीक्षणम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

प्रत्यक्षलक्षणं, षोढासन्निकर्षः, प्रत्यक्षलक्षणस्य-सन्निकर्ष-ज्ञाना-व्यपदेश्याव्यभिचारिव्यवसायात्मकपदानां प्रयोजनम्, मनस इन्द्रियत्वे बौद्धानामाक्षेपस्तत्परिहारश्च, प्रत्यक्षलक्षणे बौद्धमतखण्डनम्, अनुमान-लक्षणम्, तत्पूर्वकशब्दस्यार्थः, अनुमानत्रैविध्यम्, अनुमानविषये दर्श-नान्तरमतखण्डनम्, उपमानलक्षणम्, दिङ्नागाक्षेपस्तत्परिहारश्च, शब्द-

लक्षणम्, शब्दलक्षणेदिङ्नागाक्षेपस्तत्परिहारश्च, शब्दप्रमाणस्य द्वैविध्यम्।

ख) प्रकरणे

प्रमेयभेदाः, इच्छादिभिर्लिङ्गैरात्मानुमानप्रकारः, देहेन्द्रियबुध्यादिव्यतिरिक्तात्मसाधनम्, आत्मनित्यत्वव्यवस्थापनम्, शरीरलक्षणम्, इन्द्रियलक्षणम्, इन्द्रियाणां भौतिकत्वसाधनम्, अर्थस्वरूपकथनम्, दर्शनस्पर्शनाभ्यामेकार्थग्रहणसाधनम्, तत्र बौद्धानामाक्षेपस्तत्परिहारश्च, बुद्धिलक्षणम्, बुद्धिलक्षणे पर्यायशब्दाभिधानप्रयोजनम्, मनोलक्षणम्, ज्ञानस्यायुगपदुत्पत्तिसाधनम्, प्रवृत्तिलक्षणम्, प्रवृत्तिभेदाः, दोषलक्षणम्, प्रेत्याभावलक्षणम्, फललक्षणम्, अपवर्गलक्षणम्, नित्यसुखाभिव्यक्तेर्मुक्तित्वनिरासः।

ग) प्रकरणे

संशयलक्षणम्, संशयभेदाः, तत्र भास्यवार्तिकयोर्मतभेदः, प्रयोजनलक्षणम्, प्रयोजनस्य न्यायाङ्गत्वम्, दृष्टान्तस्य स्वरूपकथनम्, सिद्धान्तविभागस्तल्लक्षणञ्च, न्यायावयवविभागः, प्रतिज्ञादिभेदकथनम्, अवयवप्रयोजनम्, तर्कलक्षणम्, तर्कलक्षणस्थपदप्रयोजनम्, निर्णयलक्षणम्, निर्णयलक्षणे पदव्यावृत्तिकथनम्, निर्णयलक्षणविकल्पः, निर्णयानुमानयोर्भेदकथनम्।

घ) प्रकरणे

वादलक्षणम्, वादलक्षणस्थपदप्रयोजनकथनम्, वादलक्षणे बौद्धमतखण्डनम्, जल्पलक्षणम्, वितण्डालक्षणम्, वादजल्पवितण्डासु परस्परभेदकथनम्, हेत्वाभाससामान्यभेदाः, हेत्वाभासलक्षणम्, छलभेदास्तल्लक्षणानि च, जातिलक्षणम्, जातिभेदाः, निग्रहस्थानलक्षणम्, निग्रहस्थानभेदाः।

ङ) प्रकरणे

बौद्धनैयायिकाभिमतप्रमाणानां तुलनात्मकसमीक्षणम्।

पाठ्यग्रन्थः

१. उद्योतकरप्रणीतं न्यायवार्तिकम्।
(प्रत्यक्षलक्षणसूत्रतः प्रथमाध्यायान्तम्)

सन्दर्भग्रन्थाः

१. न्यायवार्तिकतात्पर्यटीका – वाचस्पतिमिश्रः
२. न्यायतात्पर्यपरिशुद्धिः – उदयनाचार्यः
३. न्यायवार्तिक एक अध्ययन – डा. दयाशङ्करशास्त्री
४. न्यायपरिचयः – फणीभूषण।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
	निबन्धात्मकेषु	तुलनात्मकाः	२	१	२०
	निबन्धात्मकेषु	व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - तृतीयम्

पाठ्यांशनाम - सूत्रभाष्यव्याख्यानम्

पाठ्यांशस्योद्देश्यम्

१. चतुर्णामेव ससंशयप्रमाणानां सम्यग्विवेचनसामर्थ्योत्पादनम्।
२. आत्मादिषट्कप्रमेयस्य विशदविवेचने क्षमतासम्पादनम्।
३. आत्मनः शब्दस्य च तुलनात्मकविश्लेषणविधाने योग्यता-समुपार्जनम्।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	ससंशयं प्रमाणसामान्य – प्रत्यक्षपरीक्षणम्	३६	२०
ख	अनुमानोपमानपरीक्षणम्	३६	२०
ग	शब्दपरीक्षणम्	३६	२०
घ	आत्मादिषट्कपरीक्षणम्	३६	२०
ङ	समीक्षात्मकमध्ययनम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

क्रमभेदेन संशयपरीक्षायां बीजम्, विचारस्य संशयपूर्वकत्व-प्रतिपादनम्, समानानेकधर्माध्यवसायादिना संशय आक्षेपाः तेषां सम्यक् समाधानानि।

माध्यमिकनयेन त्रिष्वपि कालेषु प्रमाणानामर्थासाधकत्व-प्रतिपादनम्। धर्मप्रतिषेध-विशेषप्रतिषेधादिनाऽपि प्रमाणानां प्रतिषेधाभावोपपादनम्। प्रत्यक्षादीनामप्रामाण्यमित्यादिवाक्ये व्याघातादिदोषोद्भावनम् तन्निरसनञ्च। प्रमाणप्रमेयभावस्य परमार्थसत्त्वप्रतिपादनम्। प्रमाणप्रमेयत्वसमावेशोपपादनम्। प्रमाणपरीक्षायां स्थाधात्वर्थ-कारकार्थविभागोपपादनम्। उपलब्धिः प्रत्यक्षादिविषयाः किं प्रमाणान्तरतः– प्रमाणमन्तेरणासाधनेत्यादिना प्रमाणपरीक्षायामाक्षेपः समाधानञ्च। प्रत्यक्षलक्षणपरीक्षा। अदृष्टस्य कार्यमात्रे हेतुत्वम्। प्रत्यक्षस्यानुमानान्तर्भावाक्षेपपरिहारौ। विविधाक्षेपसमाधानैरवयविपरीक्षणम् तत्साधनञ्च।

ख) प्रकरणे

अनुमानप्रामाण्यपरीक्षणम्, बाधकप्रमाणाभावेन साधकप्रमाणेन च कालासत्त्वमतनिरसनम्, विशेषप्रतिषेधादर्थव्यङ्ग्यत्वादिना च वर्तमानकाल साधनम्, उपमानपरीक्षणम्, उपमानस्यानुमानत्वाक्षेप-

समाधाने च ।

ग) **प्रकरणे**

शब्दप्रामाण्यपरीक्षणम्, शब्दस्यानुमानान्तर्भावाक्षेपपरिहारौ । प्रमणचतुष्ट्वपरीक्षणम्, अर्थापत्तेः प्रमाणन्तरत्वनिरासः, अभावस्या-प्रमाणत्वम्, शब्दस्यानुमानान्तर्भावनिरसनम् । प्रागभावस्थापनम्, अभिव्यक्तिधर्मा उत्पत्तिनिरोधधर्मेत्यादिना शब्दे संशयप्रदर्शनम्, शब्द नित्यत्वपरीक्षणम्, अनित्यत्वस्वरूपनिरूपणम्, अनित्यतानिरूपणम्, शब्दाभिव्यक्तिवाददूषणम्, शब्दानित्यत्वप्रसाधनम्, वर्णविकारवाद-निरसनम्, वर्णविकारे व्यवहारबीजवर्णनम् । पदप्रत्ययादिनिरूपणम्, पूर्वोत्तरपक्षाभ्यां पदार्थनिरूपणम्, पदशक्तिनिरूपणेऽपोहशक्यता-निरसनम्, व्यक्त्याकृंतिजातिलक्षणनिरूपणञ्च ।

घ) **प्रकरणे**

आत्मविचारः आत्मपरीक्षणे बौद्धमतनिरासः, व्यपदेशस्योभयथा सिद्धेरात्मनि संशयः, देहेन्द्रियमनोव्यतिरिक्तात्मव्यवस्थापनम्, चक्षुरद्वैत-साधनम्, आत्मनोभोगाद्युपपादनम्, अनादिनिधनत्वोपपादनश्च । विजातीय परमाणूनामनारम्भकत्वप्रतिपादनम्, शरीरेन्द्रियार्थानां विवेचनम्, बुद्धि-मनोविवेचनम्, शरीरस्यादृष्टानन्यत्वोपपादनञ्च ।

ङ) **प्रकरणे**

न्यायवैशेषिक-मीमांसामतमाश्रित्य शब्दस्य न्याय-बौद्ध-चार्वाकमतमनुसृत्य आत्मनश्च समीक्षात्मकमध्ययनम् ।

पाठ्यग्रन्थः

१. उद्योतकरप्रणीतन्यायवार्तिकस्य द्वितीयतृतीयाध्यायौ ।

सन्दर्भग्रन्थाः

१. न्यायवार्तिक एक अध्ययन - डा. दयाशङ्कर शास्त्री
२. न्यायवार्तिकतात्पर्यटीका - वाचस्पतिमिश्रः
३. न्यायतात्पर्यपरिशुद्धिः - उदयनाचार्यः
४. वैशेषिकदर्शन एक अध्ययन - नारायणमिश्र
५. हिन्दीतर्कभाषा भूमिका - आचार्य विश्वेश्वर

६. तर्कभाषा हिन्दी व्याख्या सहित– व्याख्याकार, बदरीनाथ शुक्ल
७. वैशेषिकदर्शन तुलनात्मक अध्ययन – डा. वी. सिंह

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - चतुर्थम्

पाठ्यांशनाम - षट्पदार्थविवेचनम्

पाठ्यांशस्योद्देश्यम्

वैशेषिकदर्शनसम्मतभौतिकाभौतिकपदार्थविवेचने नैपुण्यसम्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	पदार्थोद्देशनिरूपणम्	१८	१०
ख	क्षित्यादिमनोन्तद्रव्यनिरूपणम्	३६	२०
ग	रूपादिविभागान्तगुणनिरूपणम्	३६	२०
घ	अपदेशानपदेशादिसमवायान्तपदार्थविवेचनम्	३६	२०
ङ	समीक्षात्मकमध्ययनं भाष्यवैशिष्ट्यञ्च	५४	३०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

ग्रन्थाभिधेयसम्बन्धप्रयोजनप्रदर्शनम्। तत्त्वज्ञानस्यैव निःश्रेयसः साधनत्वोपपादनम्। विविधविरोधिमतदलनपूर्वकमात्यन्तिक-दुःखनिवृत्तेः पुरुषार्थत्वप्रतिपादनम्। धर्मादेवतत्त्वज्ञानोत्पत्तिसमुपपादनम्। निःश्रेयसोत्पत्तौ ज्ञानकर्मसमुच्चयाशङ्कासमाधाने। षड्विधपदार्थाना-मुद्देशनिरूपणञ्च।

ख) प्रकरणे

षड्भावानां साधर्म्यवैधर्म्यनिरूपणम्। क्षित्यादिद्रव्यचतुष्टय-निरूपणम्। चतुर्णां भूतानां सृष्टिसंहारविधिप्रतिपादनम्। शब्दस्याऽकाश-लिङ्गत्वोपपादनपूर्वकमाकाशकालदिशां निरूपणम्। देहादिव्यतिरिक्तत्व-प्रसाधनपुरःसरं वैनाशिकमतदलनपूर्वकं चात्मनिरूपणं मनसो विवेचनञ्च।

ग) प्रकरणे

साधर्म्यवैधर्म्याभ्यां गुणनिरूपणम्। रूपादिचतुष्टयस्य पाक-जत्ववर्णनम्। क्षणगणनापुरःसरं पार्थिवपरमाणुषु रूपादीनां पाक-जोत्पत्तिप्रक्रियाविवेचनम्। उत्पादविनाशप्रक्रियाविवेचनपूर्वकं सङ्ख्या-निरूपणम्। सभेदोपपादनं परिमाणपृथक्त्वयोः संयोगस्य तन्नाशविवेचन-सहितस्य च निरूपणम्। विभागजविभागोत्पादविनाशप्रक्रियानिरूपणेन सार्धं विभागजविभागविवेचनञ्च।

घ) प्रकरणे

परत्वापरत्वयोर्द्वैविध्यम्। तत्र दिक्कृतस्योत्पत्तिविनाशनिरूपणम्। बुद्धेर्व्यासतः समासतश्च भेदप्रदर्शनम्। स्वप्नस्वप्नान्तिकयोः स्वप्नभेदस्य चोपपादनपूर्वकमविद्यायाश्चातुर्विध्यविवेचनम्। लिङ्गालिङ्ग्योरनुमानस्य च निरूपणेन सहैव विद्याया भेदोपपादनम्। शब्दादीनामनुमानान्तर्भावो-पपादनम्। अपदेशानपदेशनिदर्शनतदाभासादीनां सलक्षणभेदेच्छादीनां शब्दान्तानां धर्मस्तत्साधनानाञ्च गुणानां निरूपणम्। सभेदोपभेदकर्मणां प्रविवेचनम्। सामान्यविशेषसमवायानां निरूपणञ्च।

ङ) **प्रकरणे**

षट्पदार्थिप्रशस्तपादभाष्यग्रन्थस्य द्रव्यनिरूपणान्तव्याख्याने कन्दली-किरणावली टीकाग्रन्थयोर्मिथः साम्यवैषम्यदृष्टिविषयकं समीक्षात्मकमध्ययनम् । पदार्थधर्मसङ्ग्रहवैशिष्ट्यावबोधश्च ।

पाठ्यग्रन्थौ

क)-ख)-ग) प्रकरणानां कृते

१. उदयनाचार्यरचिता प्रशस्तपादभाष्यसहिता **किरणवली** (आदितो विभागान्तगुणपर्यन्ता)

घ) प्रकरणस्य कृते

२. प्रशस्तपादभाष्यमात्रम् (परत्वापरत्वतः समाप्तिपर्यन्तम्)

सन्दर्भग्रन्थाः

१. गुणकिरणावलीप्रकाशः ।
२. रससारः (गुणकिरणावलीटीका) वादीनकृतः ।
३. किरणावलीभाष्करः - पद्मनाभमिश्रः ।
४. व्योमवती - व्योमशिवाचार्यः ।
५. कन्दली - श्रीधराचार्यः ।
६. वैशेषिकदर्शन एक अध्ययन - नारायणमिश्रः ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - पञ्चमम्

पाठ्यांशनाम- सभूषणन्यायसारविषयविवेचनम्, अनुसन्धानपद्धति-विवेकश्च ।

पाठ्यांशस्योद्देश्यम्

१. प्रासङ्गिकविविधविषयविवेचनेन सहैव प्रत्यक्षानुमानागमेति प्रमाणत्रितयविश्लेषणक्षमतासम्पादनम् ।

२. अनुसन्धानपद्धतिविषयकज्ञानसम्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	प्रत्यक्षपरिच्छेदघटककतिपयविषयप्रति-पादनम्	३६	२०
ख	आगमानुमानपरिच्छेदघटकविविधविषय-विवेचनम्	३६	२०
ग	भूषणन्यायसारयोर्वैशिष्ट्यविवेकः	१८	१०
घ	शोधानुसन्धानादिसम्बद्धसमग्रतत्त्वविचारः	५४	३०
ङ	अनुसन्धानालोकमहिमविचारः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

मङ्गलाचरणतत्फले, अभिधेयभेदाः, प्रमाणादिलक्षणप्रयोजनम्, अव्यापकादिधर्मस्यापि लक्षणत्वम्, प्रमाणसामान्यलक्षणं तद्घटकपद-प्रयोजनञ्च, संशयविपर्ययस्वप्ननिरूपणम्, भ्रमे प्रमाणोपन्यासः प्रामाण्यस्य स्वतस्त्वपरतस्त्वे, स्वपराभिमतकरणत्वपदार्थः, प्रमात्रादीनां लक्षणानि, प्रयोजनस्य प्रयोजनम्, दृष्टान्तसिद्धान्तयोः स्वरूपप्रयोजने, निर्णय-निरूपणम्, न्यायविद्यायाः सर्वोत्तमत्वम्, तत्त्वज्ञानादिनिवृत्तावाक्षेप-

समाधाने, प्रत्यक्षलक्षणं तद्पदव्युत्पत्तिः, योगिनां रागाद्यभिभूतत्वाक्षेप-तन्निरासौ, इन्द्रियाणां प्राप्यकारित्वाप्राप्यकारित्वविमर्शः, अव्यपदेश्य-पदप्रयोजनम्, परमाणोर्दशांशतानिरासः, योगिप्रतक्षणम्, सविकल्पक-निर्विकल्पकप्रत्यक्षे च ।

ख) प्रकरणे

अनुमानस्वरूपम्, तत्त्रैविध्यम्, अन्येषामनुमानलक्षणानि । बौद्धचार्वाकमतदूषणम्, प्रामाण्यं व्यवहारेणेति मतोपपादनं तन्निरसनञ्च। व्याप्तिग्रहनिरूपणम्, लिङ्गभेदाः । सामान्ये सौगताक्षेपनिरासौ, प्रसङ्ग-साधनेन सामान्यनिरासः । प्रसङ्गविपर्ययखण्डननिरासः । सामान्य-समर्थनम् । बौद्धानां हेतुत्रयनिरूपणम्, स्वभावानुपलब्धेर्निरसनम् । स्वभावहेतुखण्डनम् । कार्यकारणभावनिश्चयः । पक्षधर्मत्वादि-पञ्चरूपनिरूपणम्। हेत्वाभासनिरूपणे कालात्ययापदिष्टभेदाः । उदाहरण-मुदाहरणभासाश्च ।

आगमलक्षणम्, सौत्रलक्षणेनाविरोधोपपादनम् । मेयद्वैविध्यमत-निरासः । शब्दानुमानयोर्भिन्नत्वप्रतिपादनम् । वेदवाक्यानां प्रामाण्यम्, वेदस्य सर्वज्ञप्रणीतत्वञ्च । जैनाद्यागमानां वेदवैषम्योपपादनम् । वेदा-पौरुषेयत्वपरिहारः । जरन्नैयायिकानामुपमानं तन्निरासश्च । प्रमाणत्रित्व व्यवस्थापनम् । आत्मपरात्मनिरूपणम् । सत्कार्यवादस्तन्निराशश्च । मोक्षे नित्यसुखाभिव्यक्तिसमर्थनञ्च ।

घ) प्रकरणे

अनुसन्धेयाऽऽवश्यकशीर्षकचयनम् । शीर्षकस्य संस्कृत-वाङ्मयान्तर्निहितविविधज्ञानविज्ञानरहस्योद्घाटना-नुसन्धानशिरोबिन्दु-रूपताविचारः । अनुसन्धाननिर्देशकविशेषज्ञादियोग्यताऽवबोधन-स्वीकृतिज्ञानपूर्वकानुसन्धानप्रस्तावस्वीकृतिविचारः। अनुसन्धानोद्देश्य-व्यापकपोषकप्रकाशकसामग्रीसङ्कलनसमावेशसम्बद्धविचारः । शीर्षक-विषय-कृतिसूची-सन्दर्भसामग्री-पादटिप्पण्यादिस्थानैक-रूपताङ्क-सङ्केतादिविचारः । लघुविशेषविद्यावारिध्यादिकानुसन्धानसानुसन्धान-

भूमिकाग्रन्थसंपादनरूपरेखाविधिविचारः । सन्धानानुसन्धानादिपरस्पर सम्बन्धविचारः । शोधानुसन्धानान्वेषणगवेषणरिसर्च (पुनरावलोकन) शब्दानां साम्यवैषम्यसमन्वयान्तनिष्कर्षचिन्तनम् । शोधानुसन्धान-प्रबन्धाङ्गोपाङ्गवर्गीकृतचरणोपचरणचिन्तनम् । संस्कृत-संस्कृत्यनभि-मुखलोकाभिमुखीकरणोपायाऽनुसन्धानविचारः । विघटनपरिवर्तनोन्मुख-दुष्पथचारिसमाजसङ्घटनप्रत्यावर्तनोपयुक्तानुसन्धानाऽऽवश्यकत्व-विचारः । प्राच्यपाश्चात्यानुसन्धानगुणविशेषविचारः।

ङ) **प्रकरणे**

माधुकर्यादिवृत्तिसापेक्षसामग्रीसङ्कलन - लक्ष्यलक्षणैकचक्षुष्क-प्राच्यार्वाचीनाऽनुसन्धान-संधानविधिपर्यालोचनम् । अनुसन्धानोत्तर-कालस्फुटीभूतसत्यशिवसुन्दरादिदृष्टादृष्टश्रेयोऽभिमुखधर्मादि पुरुषार्था-ऽन्यतमप्रधानोपादेयताविचारः । आधुनिकयुगसापेक्षाऽनुसन्धानसम्पन्नता-विचारः । अनुसन्धानकर्तृ-कारयितृविद्वत्सङ्घयोरन्योन्यसम्बन्ध-विचारः । पूर्णानुसन्धानप्रकाशनदायित्वविचारश्च ।

पाठ्यग्रन्थः

क), (ख), (ग) प्रकरणानां कृते -

१. भासर्वज्ञविरचितो **न्यायसारः न्यायभूषणसहितः** (निर्दिष्टा विषया एव) संपादकः - स्वामी योगीन्द्रानन्दः

सन्दर्भग्रन्थाः

१. सर्वदर्शनसङ्ग्रहः - माधवाचार्यः
२. प्रमाणवार्तिकम् - धर्मकीर्तिः
३. तार्किकरक्षा - वरदराजः
४. साङ्ख्यतत्त्वकौमुदी - वाचस्पतिमिश्रः
५. चार्वाकदर्शन की शास्त्रीय समीक्षा - डा. सर्वानन्दपाठक

घ), (ङ) प्रकरणयोः कृते -

२. अनुसन्धानपद्धतिः - डा. भगीरथप्रसाद त्रिपाठी

सहायकसामग्री

१. अनुसन्धानको रूप र शैली – डा. चूडामणि बन्धु

२. म.सं.वि., अनुसन्धानकेन्द्रतः समायोजितानुसन्धानगोष्ठ्यां प्रस्तुतानि प्रविधिसम्बन्धीनि कार्यपत्राणि
– प्रा. विद्यानाथ उपाध्याय
– डा. प्रा. वासुदेव त्रिपाठी
– डा. जगदीशचन्द्र रेग्मी
– डा.प्रा. चूडामणि बन्धु ।

३. अन्या तत्सम्बद्धा सामग्री च ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

धर्मशास्त्रम्

स्तरगतोद्देश्यम्

१. आचारव्यवहारप्रायश्चित्तज्ञानसम्पादनसमर्थाया जनशक्ते-रुत्पादनम् ।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	व्यवहारज्ञानं गर्भाधानादिच्छुरिका-बन्धनपर्यन्तसंस्कारज्ञानञ्च	१००	४०%
द्वितीयपत्रम्	आशौचप्रायश्चित्तविवाहादिसंस्कारविवेकः	१००	४०%
तृतीयपत्रम्	श्राद्धविचारः	१००	४०%
चतुर्थपत्रम्	दायभागविचारो मुहूर्त्तविचारश्च	१००	४०%
पञ्चमपत्रम्	व्यवहारज्ञानशोधविधिज्ञाने	१००	४०%

पत्रम् - प्रथमम्

पाठ्यांशनाम- व्यवहारज्ञानं गर्भाधानादिच्छुरिकाबन्धनपर्यन्तसंस्कार-ज्ञानञ्च

पाठ्यांशस्योद्देश्यम्

१. अखिलानां व्यवहारविषयाणां गर्भाधानादिच्छुरिकाबन्धनपर्यन्तानां संस्काराणां च ज्ञानोत्पादनपूर्वकं स्वविषयसंबद्धक्षेत्रेषु निश्चयात्मिकाया जनशक्तेरुत्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	साधारणव्यवहारमातृकाप्रकरणादुपनिधि-प्रकरणपर्यन्तो भागः	३६	२०
ख	साक्षिप्रकरणतो दायविभागप्रकरणपर्यन्तो भागः	३६	२०
ग	सीमाविवादप्रकरणादारभ्य द्यूतसमाह्वय-प्रकरणं यावत्	३६	२०
घ	वाक्पारुष्यप्रकरणादारम्भ प्रकीर्णप्रकरण-पर्यन्तो भागः	३६	२०
ङ	गर्भाधानसंस्कारतश्छुरिकाबन्धनसंस्कार-पर्यन्तो भागः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

१. साधारणव्यवहारमातृकाप्रकरणम्

राज्ञः कर्तव्यम्, सभासत्स्वरूपं तत्कर्तव्यञ्च, व्यवहार-विषयः, चतुष्पाद्व्यवहारः, विवादेषु नृपसमक्षमावेदनप्रकारः, आवेदितविषयानुरूपं देयमुत्तरम्, उत्तरानुसारेणार्थिप्रत्यर्थि-निर्धारणम्, प्रतिज्ञार्थसाधनप्रस्तुतिः, अर्थिप्रस्तुतप्रमाणाधारेण जयपराजयनिर्णयः।

२. असाधारणव्यवहारमातृकाप्रकरणम्

अभियुक्तस्य प्रत्यभियोगाभावस्तदपवादश्च, विवादे प्रतिभूग्रहणम्, मिथ्याभियोगे दण्डनिर्धारणम्, साहसस्तेयादि-विवादेषु सद्य एवोत्तरदानम्, अभियोगे दुष्टपरिज्ञानम्, सपणात्मके विवादे पराजये जाते दण्डनिर्धारणम्, वस्तुतत्वानुसारेण

व्यवहारनिर्णयः, अर्थशास्त्रादितो धर्मशास्त्रस्य बलवत्त्वप्रतिपादनम्, द्विविधप्रमाणस्वरूपम्, अर्थादिविवादेषु प्रमाणबलाबलम्, अधिकृतपूगश्रेण्यादीनां व्यवहारनिर्णये बलाबलत्वम्, छलोपध्यादिभिर्निष्पादितव्यवहारासिद्धत्वम्, प्रनष्टाधिगतं धनं देयम्, निधेर्व्यवस्थापनम्, चौरहृतद्रव्यं नृपेण धनिने देयम् ।

३. **ऋणादानप्रकरणम्**

सबन्धकप्रयुक्तस्य द्रव्यस्य वृद्धिव्यवस्थापनम्, पश्वादिद्रव्यविशेषेण वृद्धिविशेषम्, युगपत्प्राप्तेषु बहुषु धनिकेषु वर्णक्रमेण धनदानम्, ऋणापाकरणासमर्थोऽधमर्णिकः स्वजात्यनुरूपेण कर्म कारयितव्यः, मध्यस्थस्थापितधनस्य गतिः, ऋणापाकरणे कर्तृभेदः, प्रातिभाव्यगतर्णापाकरणकर्तृभेदः, आधेः स्वरूपम् तत्र वृद्धिप्रकारश्च, प्रयुक्तद्रव्यद्विगुणे आधिर्मोक्तव्यः।

४. **उपनिधिप्रकरणम्**

निक्षेपस्वरूपम्, निक्षेपं यथैव गृहीतं तथैव प्रत्यर्पणीयम्, स्वेच्छया निक्षेपभोक्तरि दण्डव्यवस्था, उपनिधौ निर्धारितस्य विधेर्याचितादिष्वप्यतिदेशः ।

ख) प्रकरणे

१. **साक्षिप्रकरणम्**

साक्षिलक्षणम्, साक्षिणः सङ्ख्यानिर्धारणम्, स्त्रीबालाद्यसाक्षिणः, साक्षिश्रावणप्रकारः, साक्ष्यमङ्गीकृत्यावदने दोषः, साक्षिविप्रतिपत्तौ निर्णयप्रकारः, कूटसाक्षिस्वरूपम्, साक्षिभिः सत्योक्तौ जयोऽन्यथा पराजयः, कूटसाक्षिणां दण्डविधानम् ।

२. **लेख्यप्रकरणम्**

सभेदं लेख्यस्वरूपम्, अन्यहस्तकृतलेख्यज्ञानम्, लेख्योपरि स्वमतमधमर्णेन स्थाप्यम्, लेख्ये पितृनामपूर्वकं साक्षिनामादिकं सन्निवेश्यम्, स्वहस्तकृतलेख्यस्वरूपज्ञानम्,

दुर्लेख्यादावन्यं लेख्यं विधेयम्, लेख्यसन्देहे निर्णयोपायः, लेख्यारूढमृणमधमर्णेन देयम्, लेख्यारूढस्यर्णस्य शोधनप्रकारः।

३. दिव्यप्रकरणम्

दिव्यप्रमाणम्, महाभियोगे प्रयुक्तव्यानि तुलाग्न्यादीनि प्रमाणानि, दिव्ये साधरणविधिः, जातिवयोवस्थाविशेषानादरेण तदादरेण च परीक्षणीयानि दिव्यानि, तुलादिव्यस्य प्रयोगविधिः, अग्निदिव्यस्य प्रयोगविधिः, अग्निदिव्यपरीक्षणमण्डलप्रमाणम्, निश्चितमण्डलस्यान्तरा तप्तलौहपिण्डे पतिते वा सन्देहे पुनरग्नि-दिव्यप्रयोगः, उदकाभिर्मन्त्रणविधिः, उदकदिव्येऽनुष्ठानादिप्रकारः, विषदिव्यविधिः, कोशदिव्यविधिः, तप्तमाषादिदिव्यविधिः ।

४. दायविभागप्रकरणम्

दायशब्दार्थः, दायस्य द्वैविध्यम्, विभागस्वरूपम्, स्वत्वविचारः, पितुरिच्छया विभागः, ज्येष्ठादिविषमविभागः, समविभागः, पत्नीनां पुत्रसमांशित्वम्, पितुरूर्ध्वं पुत्रकृतविभागः, मातुर्धने प्रथमं दुहित्र्यधिकारः, अविभाज्यधनम्, पैतामहधन-विभागः, विभागानन्तरजस्य धनाधिकारः, पितृप्रसाददानम्, मातुः पुत्रसमांशित्वम्, असंस्कृतानां भ्रातृणां समुदायद्रव्येण संस्कारः, तुरीयांशं दत्वा भगिनीनां संस्कारः, दायादैः परस्परापहृतस्य द्रव्यस्य पुनर्विभागः, द्व्यामुष्यायणस्य विभागविधिः, मुख्यगौण-पुत्राणां स्वरूपम्, पुत्राणां पिण्डदानांशहरत्वम्, शूद्रधनविभागे विशेषविधानम्, अपुत्रस्य दायग्रहणक्रमः, वानप्रस्थादीनां धनस्योत्तराधिकारः, संसृष्टिस्वरूपम्, संसृष्टिनो धनग्रहणाधिकारः, क्लीबादीनां निरंशित्वम्, क्लीबादीनां पुत्रपत्नीषु विभागविशेषः, स्त्रीधनस्वरूपम्, स्त्रीधनविभागप्रकारः, वाग्दत्तायाः कन्याया विशेषव्यवस्था, भर्त्रा दुर्भिक्षाद्यतिरिक्तावस्थायां गृहीतं स्त्रीधनं देयम्, अधिवेदनसममाधिवेदनिकं धनं विद्यमानपत्न्यै देयम्, विभागसन्देहे निर्णयहेतवः ।

ग) प्रकरणे

१. सीमाविवादप्रकरणम्

क्षेत्रादीनां सीम्नो विवादे सामन्तादयो निश्चिनुयुः, स्थलाङ्गारादीनि सीमालिङ्गानि, सीमासन्देहे निर्णयोपायाः, मिथ्यावादीनां सामन्तादीनां दण्डव्यवस्था, सामन्तादीनां लिङ्गादीनां चाभावे सीमानिर्णयोपायः, आरामादिषु सीमोक्तविधेरतिदेशः, मर्यादाभेदनादौ दण्डविधानम्, सेत्वादिनिर्माणव्यवस्थापनम्, परक्षेत्रकर्षकस्य कर्तव्यम् ।

२. स्वामिपालविवादपदम्

गोमहिष्यादिभिः सस्यघाते दण्डव्यवस्था क्षेत्रस्वामिने फलदानं च, पशुविशेषे दण्डाभावः, गवादयो गोस्वामिना यथा प्रातः समर्पितास्तथैव सायं गोपेन प्रत्यर्पणीयाः, पालदोषेण गवादिनाशे दण्डव्यवस्था, गोप्रचारादिभूमिव्यवस्थाविधिः ।

३. अस्वामिविक्रयविवादपदम्

अस्वामिविक्रयव्यवहारपदलक्षणम्, अन्यविक्रीतं स्वं द्रव्यं स्वामी प्राप्नोति, नष्टापहृतादिद्रव्यशोधनविधिः, स्थानपालादिरक्षितानि नष्टापहृतानि द्रव्याणि प्रमाणैः प्रमाणयितव्यानि, स्थानपालादिस्थानस्थितानां नष्टापहृतादिद्रव्याणां स्वस्वत्वे प्रमाणैरप्रमाणिते दण्डविधिः, तस्करप्रच्छादकस्य दण्डविधानम्, निर्दिष्टकालपर्यन्तं नष्टापहृतोपलब्धं द्रव्यं नृपेण रक्षणीयम् ।

४. दत्ताप्रदानिकप्रकरणम्

दत्ताप्रदानिकस्वरूपम्, स्वं कुटुम्बानुपरोधेन देयत्वप्रतिपादनम्, स्थावरस्य प्रतिग्रहणप्रकाशः, देयं प्रतिश्रुतं दातव्यमेव।

५. क्रीतानुशयव्यवहारपदम्

क्रीतानुशयस्य स्वरूपम्, वीजायसादीनां प्रत्यर्पणविधिः, स्वर्णकम्बलादीनां परीक्षाविधिः ।

६. **अभ्युपेत्याशुश्रूषाप्रकरणम्**

अभ्युपेत्याशुश्रूषायाः स्वरूपम्, बलादिना विहितस्य दासस्य मुक्तिप्रकारः, प्रव्रज्यावसितस्यामरणाद् दासत्वम्, वर्णानुसारं दासव्यवस्था, अन्तेवासिधर्माः ।

७. **संविद्व्यतिक्रमविवादपदम्**

संविद्व्यतिक्रमलक्षणम्, स्वधर्मानुष्ठानाय ब्राह्मणानां प्रेरणम्, सामयिकादिधर्मरक्षणं ब्राह्मणस्य कर्तव्यम्, संविदुल्लङ्घने दण्डविधानम्, समूहधनापहारकाय दण्डव्यवस्था, कार्यचिन्तकानां स्वरूपम्, त्रैविद्यैर्विहितो धर्मः श्रेण्यादिष्वतिदेशः ।

८. **वेतनादानप्रकरणम्**

वेतनादानस्य स्वरूपम्, स्वाङ्गीकृतकर्माकरणे दण्डव्यवस्था, पण्यविक्रयितुर्भृत्यस्य भृतिदानप्रकारः, अनेकभृत्यसाध्यकर्मणि भृतिदानप्रकारः, भारवाहकादीनां स्वकर्मानुष्ठानम्।

९. **द्यूतसमाह्वयविवादपदम्**

द्यूतसमाह्वयस्वरूपम्, द्यूते सभिकवृत्तिप्रतिपादनम्, द्यूते यथाकृतं भागं सभिकेन राज्ञे देयम्, जितपणं जेत्रे दाप्यम्, जयपराजयविप्रतिपत्तौ निर्णयोपायः, कूटाक्षवेदिनं दण्डविधानम्, द्यूतात्तस्करादिदुष्टपरिज्ञानम्, द्यूतधर्मस्य समाह्वयेऽप्यतिदेशः ।

घ) प्रकरणे

१. **वाक्पारुष्यविवादपदम्**

वाक्पारुष्यस्य लक्षणम्, परस्परं सवर्णेषु निष्ठुराक्षेपे दण्डव्यवस्था, परभगिन्यादिभ्योऽश्लीलाक्षेपेषु दण्डविधिः, असमानवर्णाक्षेपे दण्डव्यवस्था, वर्णानां प्रतिलोमानुलोमयोः परस्पराक्षेपेषु दण्डव्यवस्था, वचनेन बाहुग्रीवाद्यङ्गविनाशाक्षेपे दण्डविधिः, परस्परं शक्ताशक्ताक्षेपेषु दण्डव्यवस्था, पातित्यहेतुभिर्वर्णिनामाक्षेपे दण्डविधानम् ।

२. दण्डपारुष्यव्यवहारपदम्

दण्डपारुष्यस्वरूपम्, दण्डपारुष्यस्य कर्तुः परीक्षाविधिः, समविषमादिवर्णेषु स्त्रीषु च भस्मादिभिस्तथाऽमेध्यादिभिश्च स्पर्शने दण्डव्यवस्था, प्रातिलोम्यापराधे दण्डविधानम्, सजातीयेषु परस्परं ताडनार्थं वधार्थं च शस्त्र उद्गूर्णे दण्डव्यवस्था, परपीडार्थं केशादिषूल्लुञ्चने दण्डविधिः, काष्ठलोष्ठादिभिर्मृदुताडने दण्डव्यवस्था, करपदादिभङ्गे व्रणोद्भेदे च दण्डविधिः, गमनभोजनादिनिरोधे ग्रीवाबाह्वादिभञ्जने च दण्डव्यवस्था, बहुभिर्मिलित्वैकस्याङ्गभङ्गकृते दण्डविधिः, कलहेऽपहृतस्य द्रव्यस्य प्रत्यर्पणम्, दण्डव्यवस्था च, ताडनादिहेतुनोत्पन्नस्य दुःखस्य निवारणार्थं समुत्थानजो व्ययो देयदण्डश्च देयः, कुड्यादिष्वभिघातादौ दण्डादिविधानम्, पश्वभिद्रोहादौ दण्डविधिः, वृक्षगुल्मादीनां शाखादिच्छेदने दण्डविधिः ।

३. साहसविवादपदम्

साहसस्य लक्षणम्, परद्रव्यापहरणरूपे साहसे दण्डविधिः, साहसप्रयोजितारं प्रति दण्डविधानम्, साहससदृशापराधेषु दण्डविधिः, मिथ्याचिकित्सकादिषु दण्डविधानम्, हीनमूल्येषु मृगचर्मादिषु बहूमूल्यजातीयसादृश्यसम्पादनेन विक्रये दण्डविधानम्, कृत्रिमकस्तूरादिकं कृत्वा विक्रये दण्डव्यवस्था, राजनिरूपितस्यार्घस्य ह्रासवृद्ध्यादिकरणे दण्डविधिः, पारदेश्यपण्येऽर्घनिरूपणप्रकारः ।

४. विक्रयासंप्रदानप्रकरणम्

विक्रयासंप्रदानस्य स्वरूपम्, विक्रीतपण्यासमर्पणे दण्डविधिः, क्रीतानुशयविशेषविधानं दण्डविधिश्च ।

५. संभूयसमुत्थानव्यवहारपदम्

संप्रतिपत्यनुसारेण लाभालाभयोर्भागनिरूपणम्, प्रतिषिद्धाचरणेन नाशितपण्यविषये व्यवस्था, निरूपणपण्यमूल्याद्विंशो

भागो नृपेण ग्राह्यस्तथा प्रतिषिद्धपण्यस्याविक्रेयत्वं पुना राजयोग्यपण्यस्याविक्रेयत्वम्, पण्यपरिमाणवञ्चकस्य विवादास्पदीभूतपण्यक्रयविक्रयणकर्तुश्च दण्डव्यवस्था, स्थलजजलजयोर्द्विविधयोः शुल्कयोर्निर्धारणं निर्धारितशुल्कानपाकरणे दण्डश्च, स्ववेश्मपार्श्वस्थान्ब्राह्मणान् श्राद्धादिष्वनिमन्त्रणे दण्डविधानम्, देशान्तरगतेषु संभूयकारिषु वणिजेषु कश्चिन्मृतश्चेत्तद्द्रव्यग्रहणाधिकारिनिरूपणम्, संभूयकारिषु वञ्चकस्य निर्लाभत्वप्रतिपादनम्, वणिग्धर्मस्य ऋत्विगादिष्वतिदेशः ।

६. स्तेयप्रकरणम्

स्तेयस्य लक्षणम्, तस्करज्ञानोपायः, शङ्कया गृहीतेन चौरेणात्मा शोधनीयः, शोधनासमर्थस्य दण्डश्च, चौर्ये निश्चिते सति द्रव्यस्वामिने द्रव्यदानमपहृतद्रव्यानुसारेण दण्डश्च, वर्णानुसारेण चौर्ये दण्डव्यवस्था, चौरादर्शनेऽपहृतद्रव्यप्राप्त्युपायः, अपराधविशेषेण दण्डविशेषः, अचौरस्यापि चौरोपकारे दण्डव्यवस्था, परगात्रेषु शस्त्रावपातने गर्भस्य पातने स्त्रीपुरुषप्रमापणे च दण्डविधिः, विशेषेण प्रदुष्टायाः स्वगर्भपातिन्याः पुरुषहन्त्र्याः सेतुभेत्र्याश्च दण्डविधानम्, स्वपतिगुर्वादीन् विषाग्निप्रदानेन मारयित्र्याः स्त्रिया दण्डविधानम्, अविज्ञातकर्तृके हनने हन्तृज्ञानोपायः, क्षेत्रवेश्मवनग्रामादिदाहकानां दण्डव्यवस्था।

७. स्त्रीसंग्रहणविवादपदम्

संग्रहणस्य स्वरूपम्, स्त्रीसंग्रहणस्य ज्ञानोपायः, संग्रहणे स्त्रीपुरुषयोर्दण्डव्यवस्था, सवर्णासवर्णयोः स्त्रीपुरुषयोः संग्रहणे दण्डविधिः, सवर्णासवर्णाकन्याहरणे दण्डव्यवस्था, कन्यादूषणे दण्डविधानम्, पशुगमने दण्डव्यवस्था, साधारणस्त्रीगमने दण्डविधिः, प्रसह्य दास्यभिगच्छतो दण्डव्यवस्था, वेतनग्रहणानन्तरमप्यर्थपतिमनिच्छन्त्याया वेश्याया दण्डविधिः, पत्न्यामयोनौ तथा प्रव्रजितायां गच्छतः पुरुषस्य दण्डव्यवस्था, चाण्डाल्याद्यभिगमने दण्डव्यवस्था ।

८. प्रकीर्णकाख्यं व्यवहारपदम्

प्रकीर्णस्य लक्षणम्, प्रकीर्णकेऽपराधविशेषेण दण्डविशेषव्यवस्था, अभक्ष्यणादिभिर्ब्राह्मणदूषणे दण्डविधानम्, कूटस्वर्णकारादीनां विमांसविक्रयीणाञ्च दण्डविधानम्, चतुष्पादादिभिः कृतो दोषोऽपसरेति वदतश्चतुष्पात्स्वामिनो नास्ति, शकटादियुक्तबलिवर्दनस्यादिच्छिन्नादिना मनुष्यादिहिंसने तत्स्वामिनो दोषाभावप्रतिपादनम्, तदुपेक्षायां तु स्वामिनो दण्डः, जारं चौरेत्यभिवदन्मुञ्चने दण्डव्यवस्था, नृपस्यानिष्टकर्तारं प्रति दण्डविधिः, मृतशरीरादादाय वस्त्रपुष्पादिविक्रेतुः पित्रादिताडयितू राजयानासनारोढुश्च दण्डव्यवस्था, परस्य द्विनेत्रभेदिनो राजद्विष्टादेशकारिणो द्विजलिङ्गधारिणः शूद्रस्य च दण्डव्यवस्था, दुर्दृष्टव्यवहारान्नृपेण पुनरवलोक्य दुर्दर्शिनः सभ्यान् विधेयदण्डव्यवस्था, न्यायतो निर्णीतस्य व्यवहारस्य प्रत्यावर्तयितुर्दण्डप्रतिपादनम्, अन्यायेन गृहीतस्य दण्डधनस्य गतिः ।

ङ) प्रकरणे

१. गर्भाधानतश्छुरिकाबन्धनान्तसंस्कारेषु

प्रथमरजोदर्शने दुष्टमासादीनां फलम्, दुष्टसमयादिषु प्रथमरजोदर्शनजन्यदोषोपशमनम्, गर्भाधानस्य शुभाशुभमुहूर्तादिज्ञापनम्, ऋतावगमे पुरुषस्य दोषप्रतिपादनम्, ऋतौ स्त्रिया अस्पृश्यत्वनिर्णयः, सवर्णासवर्णयोः परस्परं रजस्वलास्पर्शे प्रायश्चित्तनिर्णयः, चाण्डालादिस्पर्शे प्रायश्चित्तविधानम्, रजस्वलास्नानमुहूर्तादिनिर्णयः, पुंसवनसंस्कारस्य मासादिनिर्णयः, सीमन्तोन्नयनस्य मासादिनिर्णयः, सीमन्ते भुञ्जानस्य प्रायश्चित्तविधानम्, गर्भिणीतत्पतिधर्माः, सूतिकाया गृहप्रवेशमुहूर्तनिर्णयः, जातकर्मविधानम्, जन्मनि दुष्टकालानां ज्ञानं तत्फलञ्च, त्रिकप्रसवशान्तिः, जन्मानन्तरं षण्णिशायां कृत्यविधानम्, दत्तकपुत्रपरिग्रहणविधिः, यमलयोः संस्कारक्रमार्थं ज्येष्ठकनिष्ठभावनिर्णयः, सूतिकास्नानमुहूर्तादीनां निर्णयः, नामकर्मणो दिवसादिनिर्णयः, दोलारोहणस्य

दिवसादिनिर्णयः, दुग्धपानविधिः, कर्णवेधस्य मासादिनिर्णयः, ताम्बूलभक्षणविधिः, निष्क्रमणमुहूर्तम्, उपवेशने मासादिनिर्णयः, अन्नप्राशनमुहूर्तनिर्णयः, अब्दपूर्तौ विधेयानि कार्याणि, कटिसूत्र-बन्धनविधानम्, चौलेऽब्दादिनिर्णयः, शिशोर्मातरि गर्भिण्यां चूडाकार्याकार्यत्वनिर्णयः, रजस्वलायां मातरि शिशोश्चौलादि-निषेधप्रतिपादनम्, अब्दाभेदाद् वा ऋतुत्रयादर्वाग्मण्डनान्तरं मुण्डनस्याविधेयत्वम्, शिखास्थापननिर्णयः, विद्यारम्भमुहूर्तम्, अनुपनीतस्य शिशो कामचारादिनिर्णयः, उपनयनेऽब्दनिनिर्णयः काम्योपनयनेऽब्दनिर्णयः, उपनयने मासादिनिर्णयः, उपनयने लग्नादिनिर्णयः, उपनयने पक्षतिथ्यादिनिर्णयः, उपनयने नक्षत्र-वारादिनिर्णयः, सन्ध्यायामुपनयननिषेधः, उपनयनेऽधिकारि-निर्णयः, षण्ढमूकादीनां यथोचितसंस्कारव्यवस्था, संस्कारलोपे प्रायश्चित्तस्य विधेयत्वम्, ब्रह्मयज्ञारम्भः, ब्रह्मचारिधर्माः, मेखलाजिनदण्डादीनां वर्णानुसारेण निर्माणधारणादिनिर्णयः, यज्ञोपवीतनिर्माणधारणविधिः यज्ञोपवीतत्यागे प्रायश्चित्तम्, ब्रह्मचारिधर्मलोपे प्रायश्चित्तम्, पुनरुपनयने निमित्तानि, कन्याया उपनयनविचारः, अनध्यायाः, महानाम्न्यादिव्रतविधानम्, समावर्तननिर्णयः, स्नातकव्रतानि, छुरिकाबन्धनम् ।

पाठ्यग्रन्थौ

१. समिताक्षरा-याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः)
२. निर्णयसिन्धुः (तृतीयपरिच्छेदस्यादितश्छुरिकाबन्धनसंस्कारान्तो भागः)

सन्दर्भग्रन्थाः

१. धर्मकोशः (व्यवहारकाण्डम्)
२. व्यवहारनिर्णयः
३. संस्कारकौस्तुभः
४. संस्कारप्रदीपः
५. मनुस्मृतिः (राधाकृष्णाश्रमी टीका)- प्रा.डा. राधाकृष्ण अधिकारी

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - द्वितीयम्

पाठ्यांशनाम - आशौच-प्रायश्चित्त-विवाहादिसंस्कारविवेकः

पाठ्यांशस्योद्देश्यम्

१. आचारव्यवहार-प्रायश्चित्तान्तर्गतानां सम्बद्धविषयाणां व्याख्या-विश्लेषण-प्राध्यापनादिषु समर्थाया जनशक्तेरुत्पादनम् ।

२. प्रमाणोपस्थापनपूर्वकं जन्ममरणादिशौचानां नित्यनैमित्तिकादीनां धार्मिककृत्यविधीनाञ्च निर्णये समर्थस्य मनीषिमण्डलस्योत्पादनम् ।

३. धर्माचरणसन्देहभ्रान्तजनसमूहस्य समुचितनिर्णयप्रदानात् स्वधर्मस्यसंस्कृतेः राष्ट्रस्य च रक्षणाय योग्यतापादनम् ।

४. "स्मृतेः श्रुतिर्बलीयसीति" सिद्धान्तानुकूलं स्मृतिमार्गेण श्रुति-धर्मज्ञानाय समर्थानां छात्रवर्गाणामुत्पादनम् ।

५. धर्मशास्त्रविषयकग्रन्थानां संपादन-व्याख्यान-गवेषणादिषु सम्यग्योग्यताप्रदानम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	आशौचप्रकरणम्	३६	२०
ख	आपद्धर्मवानप्रस्थप्रकरणम्	१८	१०
ग	यतिधर्मप्रकरणम्	३६	२०
घ	प्रायश्चित्तचन्द्रिका	३६	२०
ङ	प्रकीर्णप्रायश्चित्तप्रकरणम्	१८	१०
च	विवाहसंस्कारनिर्णयप्रकरणम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

आशौचलक्षणम्, शवसंस्कारविचारः, उदकदानविधिः, पात्रविशेषेणोदकदानादौ च विशेषः, परमार्थचिन्तनं शोकादीनां नैरर्थक्यञ्च, आशौचिनां नियमाः, जन्ममरणाशौचयोः स्वरूपे विशेषः, वर्णवयोऽवस्थादिविशेषेण आशौचे न्यूनाधिक्यम्, प्रेतकृत्यविमर्शः, आशौचिनां नित्यनैमित्तिककर्माचरणादौ निर्णयः, पात्रविशेषादाशौचस्यापि विशेषः, आशौचसंपातादिषु विचारः, गुरु-मातुल-पुत्र-पित्रादिमरणे आशौचनिर्णयः, राज्ञां ब्रह्मचारिणामृत्विगादीनामाशौचापवादः, आशौचान्तस्नाने रजस्वलास्पर्शादौ च विचारः, आशौचशुद्धिहेतवश्च ।

ख) प्रकरणे

आपद्धर्मस्वरूपम्, ब्राह्मण-क्षत्रिय-वैश्यादिनामापत्कालवृत्तिनियमाः, निषिद्धवस्तूनामपवादः, निषिद्धकर्माचरणाद्दोषः दोषाभावश्च, आपत्काले जीवनसाधनानि, राज्ञाकृतं वृत्तिनिर्धारणम्, वानप्रस्थनियमाः, वानप्रस्थिनां द्रव्यसंचयादौ विचारः. चान्द्रायणव्रतविधानम्, भैक्षाचरणम्,

सकलानुष्ठानासमर्थे देहत्यागादिनियमाश्च ।

ग) प्रकरणे

यतिधर्माः, जीवात्म-परमात्मनोरभेदनिरूपणम्, गर्भे शरीरग्रहण-प्रकारस्तद्विकासस्वरूपं च, ज्ञानेन्द्रियकर्मेन्द्रियाणि, प्राणायतनानि, नवच्छिद्राणि, अस्थि-नाडी-शिरादीनां सङ्ख्याः, शरीरगतरसादिपरिमाणम्, परमात्मस्वरूपं शब्दब्रह्मोपासनमाहात्म्यञ्च, वीणावादनसङ्गीतादिभिश्च मोक्षप्राप्तिः, प्रवृत्तिनिवृत्तिमार्गनिरूपणम्, धारणात्मकयोगाभ्यासादि-प्रयोजनम् सदाचारव्रतपूतस्वगृहस्थस्यापि मुक्तिः ।

घ) प्रकरणे

कर्मविपाकनिरूपणं जन्मान्तररहस्यं च, नरकादिस्वरूपम्, महा-पातकानि तत्समपातकानि च, तेषां प्रायश्चित्तं प्रायश्चित्तान्तरव्यवस्था च, उपपातकानि, संसर्गजपातकानि तत्प्रायश्चित्तादीनि च ।

ङ) प्रकरणे

महापातकोपपातकादीनां प्रकारान्तरेण रहस्यप्रायश्चित्तम्, सकल-रहस्य व्रताङ्गभूता धर्माः, सान्तपन-कृच्छ्र-चान्द्रायणादीनि व्रतानि, धर्म-शास्त्रश्रुतिमाहात्म्यञ्च ।

च) प्रकरणे

विवाहादौ कन्यापरीक्षणम्, सापिण्ड्यविचारः, कन्यापरिग्रह-विमर्शश्च, दत्तकविवाहः, सापिण्ड्यम्, गोत्रप्रवरलक्षणम्, सगोत्रादिविवाहे प्रायश्चित्तम्, कन्याविवाहकालः, कन्यादातारस्तेषामभावे कन्यया स्वयंवरवरणव्यवस्था च, विवाहादौ मासनिर्णयः, नान्दीश्राद्धादिविधानञ्च, कन्यायाः वैधव्ययोगे कुम्भविवाहादिविधानम्, विवाहात् प्राक् कन्यामातृ-रजोदर्शने विचारः, विवाहादावाशौचे प्राप्ते निर्णयः, कन्याया रजोदर्शने प्रायश्चित्तव्यवस्था, कन्यावरयोर्वरणं वाग्दानं च, वाग्दानोत्तरमरणे पुनः संस्कारादिविधानम्, मङ्गलोत्तरनिषिद्धकर्मादिविचारः, वधूगृहप्रवेशे मासग्रहनक्षत्रादीनां निर्णयो विवाहान्तरविचारश्च ।

पाठ्यग्रन्थौ

१. समिताक्षरा याज्ञवल्क्यस्मृतिः । (प्रायश्चित्ताध्यायः)

२. निर्णयसिन्धुः । (विवाहसंस्कारनिर्णयान्तो भागः)

सन्दर्भग्रन्थाः

१.	प्रायश्चित्तकदम्बसारसंग्रहः	काशीनाथः
२.	प्रायश्चित्तकुतूहलम्	कृष्टारामः
३.	प्रायश्चित्तचन्द्रिका	विश्वनाथभट्टः
४.	शुद्धिमयूखः	नीलकण्ठः
५.	प्रायश्चित्तप्रयोगः	अनन्तदीक्षितः
६.	प्रायश्चित्तविवेकः	शूलपाणिः
७.	संस्कारचूडामणिः	रामकृष्णः
८.	संस्काररत्नावलिः	नृसिंहभट्टः
९.	आशौच विवेचन	, प्रा. डा. रामचन्द्र गौतम

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - तृतीयम्

पाठ्यांशनाम : श्राद्धविचारः

पाठ्यांशस्योद्देश्यम्

१. श्राद्धज्ञानसम्पादनसमर्थाया जनशक्तेरुत्पादनम्।

प्रकणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	आदितो ब्राह्मणनिरूपणान्तम्	५४	३०
ख	ब्राह्मणनिमन्त्रणादुपकरणान्तम्	३६	२०
ग	श्राद्धदिनकृत्यतःपार्वणश्राद्धनिर्णयान्तम्	५४	३०
घ	आमहेमश्राद्धनिर्णयाद् ग्रन्थसमाप्त्यन्तम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

मङ्गलाचरणम्, ग्रन्थनिर्मितिप्रवृत्तिहेतुकथनम्, सङ्क्षेपतो-विषयानुक्रमणिकाकथनम्, श्राद्धप्रशंसा, श्राद्धस्य कर्तव्यता, श्राद्धस्य स्वरूपकथनम्, श्राद्धलक्षणनिरूपणम्, मुख्यगौणभेदेन श्राद्धशब्दप्रयोग-विचारः, श्राद्धस्य यागदानरूपताविचारः, पित्रादीनां प्रत्येकं देवतात्व-निर्णयः, वस्वादीनां देवतात्वविचारः, पार्वणश्राद्धे देवताविचारः, जीवत्पितृकश्राद्धे देवतानिर्णयः, द्विपितृकश्राद्धे देवतानिर्णयः, पुत्रिकापुत्रकर्तृकश्राद्धे देवतानिर्णयः, वैश्वदेविकश्राद्धे देवतानिरूपणम्, विकिरभुक्तोच्छिष्टयोर्देवतानिर्णयः, सन्न्यासाङ्गश्राद्धदेवतानिर्णयः, विधवाकर्तृकश्राद्धदेवतानिर्णयः, विभक्तिनिर्णयः, सम्बन्धगोत्र-नामोच्चारणक्रमः, गन्धादिद्रव्यसम्प्रदाननिर्णयः, श्राद्धोचितद्रव्यनिर्णयः, अधर्मोपार्जितद्रव्यनिषेधः, श्राद्धोचितद्रव्योत्पत्तिकथनम्, ग्राह्यधान्यम्, वर्ज्यधान्यम्, ग्राह्याणि मूलफलानि, वर्ज्यानि, ग्राह्यक्षीराणि, वर्ज्यक्षीराणि,

मांसविचारः, कालविशेषावच्छेदेन तृप्तिकरपदार्थभेदकथनम्, ग्राह्यान्ननिरूपणम्, वर्ज्यान्ननिरूपणम्, श्राद्धीयब्राह्मणनिरूपणम्, ब्राह्मणप्रशंसा, श्राद्धीयप्रशस्तब्राह्मणनिरूपणम्, पङ्क्तिपावननिरूपणम्, योगिनां श्राद्धे नियोगकथनम्, गृहस्थाद्यपेक्षया योगिनां वैशिष्ट्यकथनम्, प्रशस्तब्राह्मणानुकल्पकथनम्, सन्निहितब्राह्मणानामनतिक्रमणीयत्वकथनम्, श्राद्धे वर्ज्यब्राह्मणकथनम् ।

ख) प्रकरणे

ब्राह्मणनिमन्त्रणम्, निमन्त्रणीयब्राह्मणसंख्या, निमन्त्रणपूर्वकालकृत्यम्, निमन्त्रितनियमाः, कर्तृनियमाः, कर्तृभोक्तृनियमाः, ब्राह्मणानां श्राद्धभोजननियमाः, भोजयितृनियमाः, प्राचीनावीतयज्ञोपवीतविचारः, श्राद्धीयपदार्थाः, यजमानजप्यानि, सप्तार्चिमन्त्रः, सप्तार्चिस्तोत्रम्, पितृस्तवः, श्राद्धदेशाः, निषिद्धदेशाः, श्राद्धदेशादपास्यानि द्रव्याणि, श्राद्धोपकरणानि, अर्घपात्राणि, पाकपात्राणि, भोजनपात्राणि, परिवेषणपात्राणि, गन्धाः, वर्ज्यगन्धाः, पुष्पाणि, वर्ज्यपुष्पाणि, धूपाः, निषिद्धधूपाः, दीपाः, आच्छादनम्, निषिद्धवस्त्राणि, यज्ञोपवीतम्, दण्डयोगपट्टौ, कमण्डल्वादि, छत्रम्, उपानत्पादुके, आसनानि, शय्यादि, चामरव्यजनदर्पणकेशप्रसाधनानि, हिरण्यालङ्कारादि, अलङ्कारविशेषदाने फलविशेषः, गोमहिष्यादिदानम्, गवां वर्णविशेषात्फलविशेषः, भूगृहपुस्तकाभयादिदानम्, प्रकीर्णकदानम् ।

ग) प्रकरणे

श्राद्धदिनकृत्यम्, श्राद्धदिनेऽपराह्णकृत्यम्, पुण्डरीकाक्षस्मरणादिकृत्यम्, ब्राह्मणानामासनदानादिकृत्यम्, आवाहनम्, अर्घ्याद्युपचारविधिः, अर्घदानविधिः, संस्रवग्रहणम्, गन्धादिदानम्, मण्डलकरणादयः पदार्थाः, अग्नौ करणम्, अग्नौ करणे देवतामन्त्रादयः, हुतावशिष्टप्रतिपत्तिः, परिवेषणम्, पात्रालम्भजपाङ्गुष्ठनिवेशनानि, अन्नसङ्कल्पः, सावित्रीजपादि, विकिरदानादि, पिण्डदानकालः, पिण्डदानदेशः, पिण्डदानेतिकर्तव्यता, पिण्डदानेऽन्नविशेषः, अक्षय्योदकदानम्, वरयाचना, दक्षिणादानम्, विसर्जनम्, पिण्डप्रतिपत्तिः, उच्छिष्टोद्वासनम्, श्राद्धोत्तरकालीनकर्म ।

घ) **प्रकरणे**

श्राद्धानुकल्पः – आमहेमश्राद्धम्, ब्राह्मणानुकल्पः, साङ्कल्पिकश्राद्धम्, विकृतिश्राद्धनिर्णयः, वृद्धिश्राद्धम्, सामान्यकृष्णपक्षश्राद्धम्, मघाश्राद्धम्, शस्त्रादिहतचतुर्दशीश्राद्धम्, दौहित्रकर्तृकश्राद्धम्, नित्यश्राद्धम्, सांवत्सरिकश्राद्धम्, श्राद्धभेदाः, श्राद्धविकृतिषूहः, श्राद्धाधिकारिनिरूपणम्, जीवच्छ्राद्धनिर्णयः, संन्यासाङ्गश्राद्धनिर्णयः, ग्रन्थसमाप्तिः।

पाठ्यग्रन्थः

१. वीरमित्रोदयस्य श्राद्धप्रकाशः

सन्दर्भग्रन्थाः

१. निर्णयसिन्धुः (श्राद्धप्रकरणम्)
२. धर्मसिन्धुः (श्राद्धप्रकरणम्)
३. श्राद्धविवेकः – रुद्रधरप्रणीतः
४. श्राद्धकल्पः – हेमाद्रिविरचितः
५. श्राद्धकाशिका – श्रीकृष्णमिश्रकृता

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - चतुर्थम्

पाठ्यांशनाम - दायभागविचारो मुहूर्तविचारश्च

पाठ्यांशस्योद्देश्यम्

१. दायविभागज्ञानसम्पादनसमर्थाया जनशक्तेरुत्पादनम् ।

२. मुहूर्तज्ञानसम्पादनसमर्थाया जनशक्तेरुत्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	आदितः पञ्चमाध्यायान्तम्	३६	२०
ख	षष्ठाध्यायतो ग्रन्थसमाप्त्यन्तम्	५४	३०
ग	संस्कारप्रकरणम्	३६	२०
घ	विवाहप्रकरणम्	५४	३०
योगाः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

कर्तव्यार्थप्रतिज्ञा, दायभागनिरूपणम्, दायशब्दस्य यौगिकत्व निरासेन रूढत्वप्रतिपादनम्, विभागशब्दार्थः, स्वत्वस्य लौकिकालौकिकत्वविचारः, विभागकालः, पितृधनविभागकालः, पितामहधनविभागकालः, पित्र्युपरमानन्तरं भ्रातृको विभागः, सवर्णभ्रातॄणां विभागप्रकारः, स्त्रीधननिरूपणम्, स्त्रीधनविभागः, अप्रजस्त्रीधनाधिकारिनिरूपणम्, विभागानधिकारिनिरूपणञ्च ।

ख) प्रकरणे

विभाज्याविभाज्यधननिरूपणम्, विद्याधननिरूपणम्, विभागानन्तरजातानां विभागः, विभागानन्तरागतविभागः, एकपितृकाणां सवर्णानुलोमपरिणीतस्त्रीषु जातानां पुत्राणां विभागः, पुत्रिकौरसयोर्विभागः, अपुत्रधने पत्न्याः प्रथमाधिकारनिरूपणम्, पत्न्यभावे दुहितृदौहित्राधिकारः, दौहित्राभावे पितुरधिकारः, पित्रभावे मातुरधिकारः, मात्रभावे

भ्रात्रधिकारः, भ्रात्रभावे भ्रातृपुत्राधिकारः, संसृष्टिधनविभागः, विभागकाले निह्नुतस्य विभागः, वृत्तविभागसन्देहनिर्णयः, ग्रन्थनिर्माणप्रयोजनम्, ग्रन्थकर्तुः परिचयश्च ।

ग) प्रकरणे

प्रथमरजोदर्शने शुभाशुभफलसूचकमासादिविचारः, प्रथम-रजस्वलायाः स्नानमुहूर्तः, गर्भाधानादिसूतिकास्नानान्तमुहूर्तादिज्ञानम्, प्रथममासोत्पन्नदन्तफलम्, दोलाचक्रम्, निष्क्रमणमुहूर्तः, प्रसूतिकाजल-पूजामुहूर्तः, दुग्धपानमुहूर्तः, अन्नप्राशन-भूम्युपवेशन-ताम्बूलभक्षण-कर्णवेधानां मुहूर्ताः, चूडाकर्मान्तर्गता विषयाः, अक्षरारम्भमुहूर्तः, विद्यारम्भमुहूर्तः, व्रतबन्धनिर्णयात् समावर्तनमुहूर्तान्ता विषयाश्च ।

घ) प्रकरणे

प्रश्नलग्नाद् विवाहयोगद्वयम्, अन्यद्विवाहयोगद्वयम्, प्रश्नलग्नाद् विवाहयोगत्रयम्, प्रश्नलग्नात्कुलटामृतवत्सायोगविकल्पः, विवाहभंग-योगः, बालवैधव्ययोगादि, अस्याः कन्यायाः कीदृशं प्रथमापत्यं स्यादिति प्रश्ने उत्तरम्, निमित्तवशेन शुभाशुभप्रश्नः, कन्यावर-वरणमुहूर्तौ, विवाहकालादि, प्रतिकूलनिर्णयः, विवाहानन्तरं पुरुषत्रये चूडादिनिषेधः, मूलादिदुष्टनक्षत्रोत्पन्नयोर्वधूवरयोः श्वशुरादिपीडकत्वादि, अष्टकूटानि, दुष्टकूटानां परिहारः, नाडीकूटादि, वर्गकूटम्, नक्षत्रराश्यैक्ये विशेषः, षड्वर्गदोषः, राशिनवांशयोः स्वामिनः, षड्वर्गादि, गण्डान्तादिविषयाः, कर्तर्यादि विषघट्यन्ता दोषाः, दिवारात्रिमुहूर्ताः, वारभेदेन मुहूर्ताः, विहितनक्षत्रादिकम्, वेधदोषः, पञ्चशलाकाचक्रम्, सप्तशलाकावेधः, क्रूराक्रान्तादिनक्षत्रदोषात् खार्जुरान्तादोषाः, उपग्रहदोषात्प्रकरणसमाप्त्यन्ता विषयाश्च ।

पाठ्यग्रन्थौ

१. दायभागः - जीमूतवाहनकृतः ।
२. मुहूर्तचिन्तामणिः(संस्कारविवाहप्रकरणे)-पीयूषधाराव्याख्यायुतो

सहायकग्रन्थः

१. मुहूर्तमार्तण्डः

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकाः	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - पञ्चमम्

पाठ्यांशनाम - व्यवहारज्ञानशोधविधिज्ञाने

पाठ्यांशस्योद्देश्यम्

व्यवहारस्थापनायाम्, विवाहपदनिबन्धे, विवाहसंयुक्ते, दायविभागे, वास्तुके, समयस्यानपाकर्मणि, ऋणादाने, औपनिधिके, दासकर्मकरकल्पे, सम्भूय समुत्थाने, विक्रीतक्रीतानुशये, दत्तस्यानपाकर्मणि, अस्वामिविक्रये, स्वस्वामिसम्बन्धे, साहसे, वाक्पारुष्ये, दण्डपारुष्ये, द्यूतसमाह्वये, प्रकीर्णकेषु, शोधविधौ च। व्यवस्थितिकरणात्मकज्ञानसमर्थाया जनशक्तेरुत्पादनम्।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	व्यवहारस्थापनादिसमयस्यानपाकर्मान्तो भागः	५४	३०
ख	औपनिधिद्यूतसमाह्वयान्तो भागः	३६	२०
ग	अनुसन्धानपरिचयः	५४	३०
घ	अनुसन्धानप्रबन्धसङ्घटनम्	३६	२०
योगाः		१८०	१००

पाठ्यवस्तुविवरणम्

क) व्यवहारस्थापनायाम्

१) धर्मज्ञा धर्मासनस्थाः प्रत्यधिकरणत्रयस्त्रयोऽमात्या भवन्ति ।

२) प्रत्यधिकरणत्रयाणान्त्रयाणाममात्यानां सम्भूय व्यवहारावलोकनोपदेशः ।

३) व्यावहारिकेष्वर्थेषु तिरोहितान्तरागारनक्तारण्योपध्युपह्वरकृतानां प्रामाण्याप्रामाण्यम् ।

४) अनधिकृतमर्थं कुर्वतां दण्डविधानम् ।

५) आचारव्यवहारयोः प्रामाण्यम् ।

६) अपवादं परित्यज्य पश्चिमस्य (उत्तरस्य) करणस्य प्रामाण्यम् ।

ख) विवादपदनिबन्धे

१) भाषास्वरूपम् (वादिपत्रस्वरूपम्)

२) उत्तरपत्रस्वरूपम्

३) वादिप्रतिवादिनोः प्रतिप्रश्नानामर्थानुक्रमेण निवेशनम् ।

४) विवादप्रमाणपरीक्षणम् ।

५) परोक्तहेतवः । तत्र दण्डः । स्वयंवादिदण्डश्च ।

६) अभियुक्ते निषेधः । तत्रापवादः ।

७) अभियोक्तरि निषेधः ।

८) अभियोक्तुरभियुक्तस्य च प्रतिवादसमयः ।

९) तत्र परोक्तस्य दण्डः ।

१०) परोक्तस्यापि (पराजितस्यापि) अहार्यकरणम् ।

११) निष्पततोऽभियुक्तस्य परिणामः ।

१२) प्रेतस्य विपद्ग्रस्तस्य वा प्रामाण्योपस्थापनविधिः ।

१३) पराजितात्प्रत्यर्थिनः स्वधनग्रहणप्रकारः ।

१४) राजधर्मस्य सर्वधर्मप्रवर्तकत्वम् ।

१५) विवादार्थचतुष्पादेषु प्राबल्यम् ।

१६) अर्थसाधकं प्रमाणम् ।

१७) पराजयनिमित्तानि ।

ग) विवाहसंयुक्ते

१) विवाहः । २) विवाहधर्मः ।
३) स्त्रीधनकल्पः । ४) आधिवेदनिकम् ।
५) शुश्रूषा । ६) मर्म ।
७) पारुष्यम् । ८) द्वेषः ।
९) अतिचारः । १०) उपकारः ।
११) प्रतिषेधः । १२) निष्पतनम् ।
१३) पथ्यनुसरणम् । १४) ह्रस्वप्रवासः ।
१५) दीर्घप्रवासः ।

घ) दायविभागे

१) दायक्रमः । २) पुत्रविभागः ।

ङ) वास्तुके

१) गृहवास्तुकम् । २) वास्तुविक्रयः ।
३) विवीतक्षेत्रपथहिंसा ।

च) समयस्यानपाकर्मणि

१) समयस्यानपाकर्म ।

छ) ऋणादाने

१) ऋणादानम् ।

ज) औपनिधिके

१) औपनिधिकम् ।

झ) दासकर्मकरकल्पे

१) दासकर्मकरकल्पः ।

ञ) सम्भूयसमुत्थाने

१) सम्भूयसमुत्थानम् ।

ट) विक्रीतक्रीतानुशये -

१) विक्रीतानुशयः । २) क्रीतानुशयः ।

ठ) दत्तस्यानपाकर्मणि -

१) दत्तस्यानपाकर्म ।

ड) अस्वामिविक्रये -

१) अस्वामिविक्रयः ।

ढ) स्वस्वामिसम्बन्धे -

१) स्वस्वामिसम्बन्धः ।

ण) साहसे

१) साहसम् ।

त) वाक्पारुष्ये

१) वाक्यारुष्यम् ।

थ) दण्डपारुष्ये

१) दण्डपारुष्यम् ।

द) द्यूतसमाह्वये

१) द्यूतम् । २) समाह्वयः ।

ध) प्रकीर्णकेषु

१) द्वादशपणदण्डार्हा व्यवहाराः ।
२) चत्वारिंशत्पणदण्डार्हा व्यवहाराः ।
३) शतपणदण्डार्हा व्यवहाराः ।
४) प्रथमसाहसदण्डार्हा व्यवहाराः ।
५) मध्यमसाहसदण्डार्हा व्यवहाराः ।
६) उत्तमसाहसदण्डार्हा व्यवहाराः ।
७) सहस्रपणदण्डार्हा व्यवहाराः ।
८) अपराधानुसारं दण्डविशेषः ।
९) अनुग्राह्यापराधिनामुल्लेखः ।
१०) येषां कार्यं धर्मस्थैर्विधेयं तेषां निर्देशः ।

११) पुरुषाणां पूज्यत्वनिमित्तानि ।

१२) धर्मस्थानां कृते उक्तव्यवहारव्यवस्थापनप्रकारनिर्देशः।

न) **शोधविधौ**

१) अनुसन्धानबोध्यार्थः ।

२) अनुसन्धानस्यावस्था ।

३) अनुसन्धानस्य महत्त्वं परम्परा च ।

४) अनुसन्धानाधिकारी ।

५) विषयनिर्वाचनम् ।

६) अनुसन्धानस्य प्रस्तावः ।

७) सामग्रीसंग्रहः ।

८) पुस्तकालयप्रयोगः ।

९) अध्ययनं विश्लेषणं निष्कर्षश्च ।

१०) अनुसन्धानपद्धतिः ।

११) अवयवसंघटनम् ।

१२) प्रबन्धसारः ।

१३) टङ्कनम् ।

१४) अनुसन्धातृपरिचयः ।

१५) आन्तरिकपरीक्षणम् ।

१६) बाह्यमूल्याङ्कनम् ।

१७) परिशिष्टञ्च ।

पाठ्यग्रन्थौ

१. कौटलीयार्थशास्त्रम् ।(धर्मस्थीयं तृतीयमधिकरणम्)

२. अनुसन्धानप्रकाशः ।(हरिप्रसादस्थानेश्वरयोः)

सहायकग्रन्थाः

१. धर्मकोशः । (व्यवहारकाण्डम्)

२. द्वैतनिर्णयः ।

३. धर्मद्वैतनिर्णयः ।

४. धर्मसंग्रहः ।

५. व्यवहारनिर्णयः ।

६. धार्मिकविमर्शसमुच्चयः ।

७. अनुसन्धानपद्धतिः ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

फलितज्यौतिषम्

स्तरगतविषयशिक्षणोद्देश्यम्

१. फलितज्यौतिषानुसारेण जातकस्य भूत-भविष्यद्-वर्तमान-कालिकविशिष्टफलादेशे समर्थाया जनशक्तेरुत्पादनम्।

२. जातकहोरासंहितादिफलितज्यौतिषप्रतिपादितविषयाणां समालोचनात्मकाध्ययने तेषां समन्वयकरणे च सामर्थ्योत्पादनम्।

३. पौरस्त्यपद्धत्याः वास्तुशास्त्राणां विवेचने ग्रहचारादीनां तथा प्राकृतिक-परिवर्तनानाञ्चाधारे विशिष्ट-फलादेशे सामर्थ्य-सम्पादनम्।

४. फलितज्योतिर्विदां कृतिविवेचने परिचयप्रदाने शोधपद्धतिपरिज्ञाने च सामर्थ्योत्पादनम्।

५. फलितज्यौतिषस्य संरक्षणे संवर्धने च समर्थाया जनशक्तेरुत्पादनम्।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	होराशास्त्राधारे शुभाशुभफलविवेचनम्	१००	४०
द्वितीयपत्रम्	संहिताशास्त्रं फलशास्त्रञ्च	१००	४०
तृतीयपत्रम्	संहिताशास्त्रम्	१००	४०
चतुर्थपत्रम्	जातकपद्धत्या फलादेशप्रकारः	१००	४०
पञ्चमपत्रम्	स्वराधारे फलादेशप्रकारः शोधपद्धतिश्च	१००	४०

पत्रम् - प्रथमम्

पाठ्यांशनाम- होराशास्त्राधारे शुभाशुभफलविवेचनम्

पाठ्यांशस्योद्देश्यम्

१) राशिशीलपरिज्ञानपूर्वकं ग्रहस्थानानुरूपफलादेशपरिज्ञानं सापवाद-

मरिष्टफलनिरूपणम्।

२) ग्रहाणां योगचारानुसारेण फलादेशपरिज्ञानम्।

३) लग्नादिभावस्थग्रहाधारे जातकस्य शुभाशुभत्वविवेचनमायुर्दाय-साधनम्।

४) दशान्तर्दशाफलसमीक्षणं स्त्रीजातकफलनिदर्शनमष्टवर्गफलसाधनं वियोनिजत्मपरिज्ञानञ्च।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	सारावल्याः शास्त्रावताराध्यायात् सकलारिष्ट-भङ्गाध्यायान्तो भागः	३६	२०
ख	सारावल्याश्चन्द्रयोगाध्यात् शनिचाराध्यायान्तो-भागः	५४	३०
ग	सारावल्या ग्रहभावफलाध्यायात् आयुर्दाया-ध्यायान्तो भागः	५४	३०
घ	सारावल्या मूलदशाफलाध्यायादवशिष्टो भागः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

शास्त्रावतार-प्रयोजनम्, राशिभेदनिरूपणम्, ग्रहगुणवर्णनम्, मिश्रकवर्णनम्, योग-कारक-ग्रहाणां फलविवेचनम्, कारकाधारे फल-कथनम्, आधानस्थितिज्ञानम्, जन्मस्थितिपरिज्ञानम्, अरिष्टवर्णनम्, चन्द्रकृतारिष्टविवेचनम्, सकलारिष्टभङ्गसमीक्षणम्।

ख) प्रकरणे

चन्द्रसूर्ययोगाधारे फलकथनम्, द्वित्रिचतुःपञ्चषड्ग्रहयोगाधारे फलादेशप्रकारः, प्रव्रज्यानाभसयोगानां सलक्षणं फलसमीक्षणम्, ग्रहाणां चारवशात् चन्द्रनवमांशवशाच्च फलादेशप्रकारवर्णनम्।

ग) प्रकरणे

ग्रहाणां भावफलविवेचनम्, द्विग्रहकेन्द्रफलपरिज्ञानम्, भाग्यचिन्ताविचारः, कर्मचिन्ताविचारः, लोकयात्राविचारः, राजयोगविश्लेषणम्, रश्मिचिन्तानिरूपणम्, पञ्चमहापुरुषलक्षणवर्णनम्, गुणतत्त्वफलविवेचनम्, राजयोगभङ्गपरिज्ञानम्, आयुर्दायसंसाधनम् ।

घ) प्रकरणे

मूलान्तर्दशाफलवर्णनम्, दशारिष्टफलज्ञानम्, उच्चादिस्थग्रहफल-विवेचनम्, स्त्रीजातकपरिज्ञानम्, निर्याणफलनिरूपणम्, नष्टजातकज्ञानम्, होरागुणकथनम्, होराद्रेष्काणनवमांशफलवर्णनम्, सफलमष्टवर्गकुण्डलीनिर्माणम्, वियोनिजन्मपरिज्ञानम् ।

पाठ्यग्रन्थः

१. सारावली - कल्याणवर्मा ।

सहायकग्रन्थः

१. मानसागरी ।

२. बृहज्जातकम् - वराहमिहिरः ।

३. ऐतिहासिक कुण्डलीदर्पण - शङ्करमानराजवंशी ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - द्वितीयम्

पाठ्यांशनाम - संहिताशास्त्रं फलशास्त्रञ्च

पाठ्यांशस्योद्देश्यम्

१. ग्रहाणां गतिप्रकृतिसंस्थानमाकारादिज्ञानम्।
२. ग्रहाणां गतिस्थित्यादिवशात्, शुभाशुभफलकथनम्।
३. ग्रहाणां युद्धसमागमवशात्, शुभाशुभफलनिरूपणम्।
४. ग्रहणवशात् शुभाशुभफलादेशप्रकारपरिज्ञानम्।
५. पराशरोक्तफलादेशविधानम्।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	बृहत्संहिताया उपनयनाध्याय-सांवत्सर-सूत्राध्यायौ	३६	२०
ख	बृहत्संहिताया आदित्य-चन्द्र-राहु-भौम-बुधचाराध्यायाः	५४	३०
ग	बृहत्संहिताया बृहस्पति-शुक्र-शनैश्चरचाराध्यायाः	३६	२०
घ	पाराशरीयफलादेशप्रकारः	५४	३०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

मुनिकृतानां ग्रन्थानां समीक्षणपूर्वकं ग्रन्थारम्भस्यौचित्योपस्थापनम्, जगदुत्पत्तिक्रमः, ज्योतिःशास्त्रस्वरूपं सञ्ज्ञान्तराणि च, स्कन्धत्रयविभागः, ज्योतिषशास्त्रस्य सारकथनप्रतिज्ञा, सांवत्सर (दैवज्ञ) लक्षणम्, त्रिस्कन्धवाक्प्रशंसा, होराजातकयोर्भेदाः, संहिताशास्त्रप्रशंसा, संहिताशास्त्रे वर्ण्यविषयाः, ज्योतिषशास्त्रस्य ज्ञानं विनैव दैवज्ञत्वे दूषणानि, विदग्धसांवत्सरिकस्य लक्षणम्, तिथिनक्षत्रश्रवणफलम्, आप्तदैवज्ञलक्षणम्।

ख) प्रकरणे

अयनलक्षणं तत्परीक्षणं तद्वशेन फलकथनञ्च, त्वष्टाच्छादनादर्कस्य शुभाशुभफलम्, चन्द्रार्कमण्डलगतानां तामसकीलकानां दर्शनवशाद् वर्णस्थानाकृतिवशाच्च शुभाशुभफलम्, अर्करश्मिवर्णाकृतिवशेन फलनिरूपणम्, भास्करस्य ऋतुवर्णलक्षणं तद्वशेन फलकथनम्, अर्कस्य सन्ध्यकाले शुभाशुभलक्षणम्, अर्काक्रान्तनक्षत्रफलम्, सफलं प्रतिसूर्यलक्षणम्, राज्ञोऽन्तकरजनघातकर-रविलक्षणमन्यशुभलक्षणञ्च, सूर्यरश्मिभिश्चन्द्रस्य शुक्लत्वम्, चन्द्रस्य शुक्लवृद्धिवर्णनम्, चन्द्रस्य नक्षत्रगमनयोगादिवशेन शुभाशुभफलम्, चन्द्रशृङ्गाकारवशेन फलादेशः, चन्द्रबिम्बस्य स्वल्पबृहदाकारादिवशेन फलकथनम्, चन्द्रस्य कुजादिभिर्ग्रहैः सह संयोगेन शृङ्गभेदने फलम्, भौमादिग्रहैर्विदारितस्य चन्द्रस्य फलविचारः, ग्रहणकाले उल्काहतचन्द्रस्य फलम्, चन्द्रस्य परुषादिवर्णवर्णनम्, चन्द्रस्य हिमकुन्दादिस्वरूपवशेन शुभाशुभफलम्, पक्षयोर्दिनसंख्यावशेन शुभाशुभफलम्, अविकृतगतिककुमुदादिवद्गौरचन्द्रस्य फलम्, राहुविषये मतान्तरं विविच्य स्वमतोपस्थापनम्, चन्द्रसूर्ययोर्ग्रहणे ग्राहकादिविवेचनम्, ब्रह्मादिसप्तपर्वणां सफलानि नामानि, एकस्मिन् मासे चन्द्रसूर्ययोर्ग्रहणफलम्, ग्रस्तोदितग्रस्तास्तयोश्चन्द्रार्कयोग्रहणफलम्, उदयात् प्रभृत्यस्तमयं यावत् कुत्रचिद् ग्रस्तयोश्चन्द्रार्कयोः सप्तस्वाकाशभागेषु फलविचारः, सौम्ययाम्यायने तथा सौम्यादिदिक्षुग्रहणफलम्, मेषादिराशिषु ग्रस्तयोश्चन्द्रार्कयोः फलम्, सव्यापसव्यादिदशग्रासास्तेषां सफलानि लक्षणानि, राहोः श्वेतादिवर्णफलम्, ग्रस्तयोश्चन्द्रार्कयोर्भौमादिग्रहदृष्टिफलानि, भौमादिग्रहाणां ग्रस्तानां पृथक् पृथक् फलानि, कार्तिकादिमासेषु राहुदृष्टं फलम्, चन्द्रार्कग्रहणयोर्दशमोक्षभेदास्तेषां सफलानि नामानि, ग्रहणमुक्तेः सप्ताहान्तफलानि, चन्द्रग्रहणानन्तरमर्कग्रहणस्यार्कग्रहणानन्तरं चन्द्रग्रहणस्य फलम्, भौमस्य सफलानि पञ्चवक्त्रलक्षणानि, भौमस्य नक्षत्रयोगवशेन फलं विशेषयोगफलञ्च, रोहिणी-श्रवण-मूल-ज्येष्ठा-त्र्युत्तरा-स्थित भौमस्य शुभाशुभफलम्, कतिचिन्नक्षत्रैः सहोदितस्य भौमस्य फलम्, भौमस्य सफलं वर्णलक्षणम्, बुधोदितफलम्, नक्षत्रस्थ-

बुधस्य फलम्, बुधस्य सप्तगतयस्तासां नक्षत्रवशेन सफलानि नामानि, तत्र पराशरमतञ्च, देवलमतेन सफलं गतिचतुष्टयम्, बुधस्योदयास्तवशेन शुभाशुभफलम्, बुधस्य सफलं बिम्बलक्षणम् ।

ग) प्रकरणे

कृतिकादिनक्षत्रवशेन कार्तिकादिमासक्रमेण च वर्षसंज्ञा, तासां फलानि च, नक्षत्रस्थगुरोर्विशेषफलम्, गुरोः सफलं वर्णलक्षणम्, संवत्सरपुरुषविचारः, सष्ट्यब्दानयनप्रकारः, बृहस्पतिनक्षत्रज्ञानं तद्वशेन वर्षज्ञानम्, पञ्चवर्षात्मकद्वादशयुगानां नामानि तेषां पृथक् पृथक् फलानि च, षष्ट्यब्दपूर्वस्य प्रभवाख्यस्य प्रवृत्तिकालज्ञानं तदन्येषु च सफलानि नामानि, वीथीविषयकविचारः, दिवादृष्टस्य शुक्रस्य विशेषफलम्, शुक्रस्य नक्षत्रभेदफलम्, शुक्रकृतरोहिणीशकटभेदफलम्, नक्षत्रेषु गतशुक्रस्य फलम्, शुक्रस्य तिथिषूदयास्तफलम्, अन्योन्यं सप्तमस्थयोर्गुरुशुक्रयोः फलम्, नक्षत्रेषु गतशुक्रस्य फलम्, शुक्रस्याग्रवर्तिनां सर्वग्रहाणां फलम्, शुक्रस्याग्रवर्तिग्रहाणां पृथक् पृथक् फलानि, शनैश्चरस्य नक्षत्रावस्थिति-वशेन फलम्, विशाखास्थगुरोः कृतिकास्थसौरस्य तथा अनयोरेकर्क्षगतयोः फलम्, वर्णस्वरूपं लक्षणञ्च।

घ) प्रकरणे

पराशरग्रन्थे वर्ण्यविषयनिर्देशः, फलादेशोपदेशः, पराशरशास्त्रस्य विशेषता, ग्रहदृष्टिस्थानम्, भावस्थ-भावाधीशग्रहवशेन तेषां सम्बन्धवशेन च शुभाशुभफलकथनम्, प्रबलं मारकस्थानम्, कर्मनेतृत्वे त्रिकोणनेतृत्वे च शुभकारकाः ग्रहाः, भावसम्बन्धवशेन शुभाशुभयोगकारका ग्रहाः, भाग्ययोग-राजयोगकारका ग्रहाः, अन्तर्दशादौ योगजं फलम्, आयुर्दाय-विषये बलिष्ठं मारकस्थानम्, आयुसमाप्तियोगः, मारके शनिग्रह-वैशिष्ट्यम्, दशान्तर्दशावशात् शुभाशुभफलमीमांसा, केन्द्रेशदशा, राजयोगारम्भे मारकेशेन सह सम्बन्धः, योगजं शुभफलम्, अन्तर्दशानु-सारेण योगकारकौ तमोग्रहौ, पापमिश्रात्यन्तपापफलप्राप्तियोगाः, शुभ-भुक्तिषु पापभुक्तिषु च मारकयोगः, व्यत्ययेन शुभाशुभफलदौ शनिशुक्र-ग्रहौ, विख्यात-राजयोगः ।

पाठ्यग्रन्थौ

१. बृहत्संहिता – वराहमिहिरः ।

२. लघुपाराशरी – पराशरः ।

सहायकग्रन्थौ

१. नारदसंहिता ।

२. गर्गसंहिता ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकृतयः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् – तृतीयम्

पाठ्यांशनाम – संहिताशास्त्रम्

पाठ्यांशस्योद्देश्यम्

१) केत्वगस्त्यसप्तर्षिचार–ग्रहभक्तियोग–ग्रहयुद्ध–ग्रहवर्षफलानां लक्षणानि फलानि च ।

२) गर्भलक्षण–प्रवर्षण–रोहिणीयोग–वातचक्र–सद्योवर्षण–सन्ध्या–दिग्दाहानां सलक्षणं फलवर्णनम् ।

३) उल्का–भूकम्प–परिवेषेन्द्रायुध–निर्घात–सस्यजातकानां लक्षण–

फलकथनम् ।

४) द्रव्यनिश्चयार्घकाण्डेन्द्रध्वजसंपन्नीराजन-खञ्जनकानां सफलं लक्षणकथनम् ।

५) उत्पात-मयूरचित्रक-पुष्यस्नान-पट्ट-खङ्गाङ्ग-पिटकानां लक्षणानि फलानि च ।

प्रकरणविभाग:

प्रकरणानि	पाठ्यांशविषया:	पाठा:	अङ्का:
क	बृहत्संहिताया: केतुचाराध्यायाद् ग्रहशृङ्गाटकाध्यायान्तो भाग:	५४	३०
ख	बृहत्संहिताया गर्भलक्षणाध्यायात् प्रतिसूर्यलक्षणाध्यायान्तो भाग:	५४	३०
ग	बृहत्संहिताया निर्घातलक्षणाध्यायादुत्पातान्तो भाग:	३६	२०
घ	बृहत्संहिताया मयूरचित्रकाध्यायात् पिटकलक्षणाध्यायान्तो भाग:	३६	२०
योग:		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे -

केतुचाराध्यायोक्तदिव्यान्तरिक्षभौमादिशुभाशुभकेतूनां लक्षणानि फलानि च, अगस्त्योदयकारणात् समुद्रादीनां शोभावर्णनं तल्लक्षणकथनञ्च, सप्तर्षिदिक्संस्थानलक्षणानि, उल्कादिहतमुनीनां लक्षणं फलञ्च, मध्यादिषु देशेषु दिक्षु च परिगणिता देशा: कृत्तिकादिषु त्रिषु त्रिषु नक्षत्रेषु भवन्तीति कथनम्, पदार्था: कृत्तिकादिनक्षत्राणामधीने सन्तीति कथनम्, ग्रहयुतौ देशजनविशेषेण ग्रहाधिपत्यानि, ग्रहयुद्धस्य लक्षणं फलञ्च, सर्व-ग्रहविनितभौमादिग्रहाणां लक्षणं फलञ्च, राशिग्रहसमागमयोगा:,

सूर्यादिग्रहवर्षफलानि, ग्रहशृङ्गाटकोक्तनक्षत्रस्थ ग्रहजन्यफलानि ।

ख) प्रकरणे

सप्रयोजनं गर्भ (गगनस्थजलवाष्पराशि), लक्षणम्, धृतस्य गर्भस्य प्रसव (जलवर्षण) कालनिरूपणं मेघादीनां लक्षणानि च, गर्भधारण-प्रवर्षणाध्यायोक्तविषयाः, चन्द्रस्य रोहिण्यादिनक्षत्रैः सह योगे जातानि शुभाशुभफलानि, अष्टदिक्स्थवातानाम्, वर्षाप्रश्नलग्नाद् द्वादशभावस्थ ग्रहजन्य सद्योवर्षणयोगानाम्, कुसुमलताध्यायोक्तविषयाणां लक्षणानि फलानि च, सन्ध्या-दिग्दाह-भूकम्पोल्कापरिवेषलक्षणाध्यायेषु कथिता विषयाः, तत्तद्-विषयकलक्षणानि फलानि च, इन्द्रायुध-गन्धर्वनगर-प्रतिसूर्यलक्षणाध्यायेषु प्रोक्ता विषयास्तेषां लक्षणानि फलानि च ।

ग) प्रकरणे

सलक्षणं निर्घातस्य फलकथनम्, सस्य जातकथनम्, विभिन्नानां योगानां विवेचनं च, सफलं वर्गीकृतद्रव्याणां मेषादिराश्याधिपत्यकथनम्, अर्घकाण्डस्य प्रयोजनं राशिषु वस्तूनां क्रयविक्रयनियमकथनम्, इन्द्रध्वजोत्पत्तिकारणं तत्रस्थपिटकादिचिह्नानां विवेचनं फलकथनञ्च, निराजनस्य लक्षणं विधानं शान्तिगृहतुरगादीनां लक्षणानि फलानि च, खञ्जनक (विहग)स्य लक्षणं तद्दर्शनफलकथनञ्च, सलक्षणमुत्पातोत्पत्ति-कारणं तज्जन्यशुभाशुभफलानि च ।

घ) प्रकरणे

मयूरचित्रकस्य परिचयकथनं तदाधारेण यथोक्तफलकथनञ्च, पुष्यस्नानस्य महत्त्वकथनं तदर्थं स्थानस्य चयनं तत्प्रकारकथनञ्च, विस्तृतरूपेण पट्टस्य शुभाशुभलक्षणकथनम्, खड्गस्य लक्षणम्, प्रमाणम्, तत्रस्थव्रणानां शुभाशुभफलकथनम्, अङ्गविद्याध्यायान्तर्गतानां विभिन्नानां विषयाणां समीचीनतयाध्ययनम्, सफलं ब्राह्मणादिवर्णानां पिटकस्य लक्षणं स्थानवशात् तस्य शुभाशुभफलकथनञ्च ।

पाठ्यग्रन्थः

१. बृहत्संहिता ।

सन्दर्भग्रन्थौ

१. गर्गसंहिता ।

२. नारदसंहिता ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - चतुर्थम्

पाठ्यांशनाम - जातकपद्धत्या फलादेशप्रकारः

पाठ्यांशस्योद्देश्यम्

१. राशिसंज्ञापरिशीलनपूर्वकं ग्रहाणां नामस्वरूपगुणभेदवर्णनम् ।

२. वियोनिजन्मनिरूपणं प्रसवस्थितिपरिज्ञानं सभङ्गमरिष्टविवेचनञ्च।

३. आयुर्दायसाधनं सापवादं योगानुरूपफलकथनञ्च ।

४. ग्रहस्थित्याधारे राजयोगसमीक्षणम्, जन्मवारादिवशाज्जातकस्य शुभाशुभफलादेशप्रकारपरिज्ञानञ्च ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	जातकपारिजातस्य राशिशीलाध्यायो ग्रह-नामस्वरूपगुणभेदाध्यायश्च	३६	२०
ख	जातकपारिजातस्य वियोनिजन्माध्यायो-ऽरिष्टाध्यायश्च	३६	२०
ग	जातकपारिजातस्य आयुर्दाध्यायजातक-भङ्गाध्यायौ	३६	२०
घ	जातकपारिजातस्य राजयोगद्व्यादिग्रहयोग-मान्द्यादिफलाध्यायाः	७२	४०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

राशीनां विशेषसंज्ञानिदर्शनपूर्वकं तेषां बलाबलादिज्ञानम्, ग्रहाणां मूलत्रिकोण-नीचोच्च-दशवर्गिज्ञानोपायाः, दशवर्गजनितपारिजातादि-विशेषसंज्ञापरिज्ञानम्, षड्वर्गसंज्ञानिरूपणम्, द्वादशभावानां विशेषसंज्ञा-परिज्ञानं केन्द्रादिनामकरणञ्च, राशीनामुदयनामानि शुभाशुभयोगा वासदेशाः प्लवत्वनिरूपणानि, ग्रहाणां कालात्मादिपरिज्ञानमुपग्रहनिदर्शनञ्च, रव्यादिग्रहाणां स्वरूपनिदर्शनपुरःसरं वर्णद्रव्यादिज्ञानम्, ग्रहाणां दृष्टिस्था-नादिविवेचनं ग्रहैःसामान्यविचारणीयविषयपरिज्ञानञ्च, ग्रहाणां भावस्था-नादिनिरूपणपूर्वकं पीडाकरणप्रकारपरिज्ञानम्, राशौ फलपरिपाकपरिज्ञानं रोगनिवृत्तये ग्रहदेवपूजनम्, ग्रहाणां बाल्याद्यवस्थापरिज्ञानं ग्रहजन्य-शुभाशुभफलप्राप्तिकालवर्णनम्।

ख) प्रकरणे

जन्मलग्नाद् वा प्रश्नलग्नाद् वियोनिजन्मप्रकारज्ञानम्, वियोन्यङ्गे राशिस्थापनप्रकारः, वियोनिवर्णज्ञानम्, चतुष्पदादिजन्मज्ञानम्, निषेक-विधिः, गर्भधारणलक्षणम्, निषेककालान्मैथुनादिप्रकारपरिज्ञानम्,

निषेककालाद् वा जन्मकालात् पित्रादीनां शुभाशुभत्वम्, गर्भाधाने शुभाशुभकालनिर्णयः, ऋतौ ग्रहस्थितिवशात् पुत्रादिजन्मविवेचनम्, प्रसूतिकालज्ञानोपायः, दीर्घकालप्रसवयोगः, निषेककालात् संस्कारविहीनादीनां जन्मज्ञानम्, जन्मदेशज्ञानोपायः, मात्रा त्यक्तयोगः, मात्रा त्यक्तस्यापि दीर्घायुष्यादिविचारः, जन्मलग्नात् प्रसवस्थानादिविचारः, उपसूतिकाज्ञानं जातकस्य स्वरूपज्ञानम्, जाताङ्गे चिह्नज्ञानम्, द्वादशवर्षे आयुषोऽनिश्चितत्वे कारणम्, अरिष्टपूर्वकमायुषां भेदाः, पित्रादीनामरिष्टदा ग्रहस्थितयः, गर्भमासेश्वराः, गर्भे सुखयोगाः, जातकस्य आत्मनः पितुश्च मरणयोगौ, एकद्वित्र्यादिवर्षेषु मरणयोगाः, अल्पायु-र्योगाः, सामान्यारिष्टभङ्गयोगाः, चन्द्रादिग्रहजन्यारिष्टभङ्ग-योगाः, मध्यमायुर्दायादीनां भेदवर्णनम्, ब्रह्मपदप्राप्तियोग-ज्ञानम्, आयुषः सप्तभेदानां वर्णनम्।

ग) प्रकरणे

निसर्गाद्यायुषां स्पष्टीकरणम्, मनुष्येतरणामायुर्ज्ञानम्, अरिष्टदशापरिज्ञानम्, छिद्रग्रहलक्षणं तद्दशाफलवर्णनम्, द्रेष्काणस्वरूपम्, जीवदेहमृत्युसंज्ञापरिज्ञानम्, सहेतुकं निर्याणकालसाधनम्, हस्तादिविच्छेदयोगाः, दुर्मरणयोगः, निर्याणदिग्ज्ञानम्, मोहकालः, शवपरिणामः, मरणान्तरगतिज्ञानम्, राजयोगभङ्गयोगानां वर्णनम्, नीचस्यापि विद्वत्त्वे कुलीनस्यापि मूर्खत्वे योगद्वयवर्णनम्, भिक्ष्वादियोगानां लक्षणानि फलानि च, सूर्यस्थित्या नेत्रविकारयोगपरिज्ञानम्, रोगयोगसर्पभययोगयोर्निदर्शनम्, कर्णरोगादीनां लक्षणानि फलानि च, देवभूतप्रेतादिदर्शनजातरोगयोगानां वर्णनम्, रोगयोगविवरणम्, कामादियोगवर्णनम्, सुखयोगनिरूपणम्।

घ) प्रकरणे

सामान्यराजयोगवर्णनम्, नृपतुल्ययोगज्ञानम्, विविधराजयोगानां भेदाः, ग्रहाणामुच्चादिवशेन फलदानप्रकारः, पञ्चमहापुरुषयोगाः, रुचकादियोगानां लक्षणानि फलानि च, केमद्रुमसमानयोगवर्णनम्, केमद्रुमयोगापवादाः, कुजादिजन्यसुनफादियोगानां विशेषफलानि, शकटादियोगानां लक्षणानि फलानि च, चन्द्रलग्नाधियोगपरिज्ञानम्, गजकेशर्यादियोगफलानि, शुभाशुभकर्तरियोगाः, पर्वतादियोगानां लक्षणानि फलानि

च, आश्रयदलयोगलक्षणं प्राचीनैरनयोर्लक्षणफलाऽवर्णने कारणम्, गदादियोगानां लक्षणानि फलानि च, संख्यायोगाः, आश्रयादियोगफलानि, द्व्यादिषड्ग्रहयोगफलानि, मेषादिद्वादशराशिस्थग्रहफलानि, ग्रहाणां दृष्टिफलानि, चन्द्रदृष्टिवशाद् विशेषफलकथनोपायाः, लग्नादि-द्वादशभावस्थितग्रहफलानि, स्वोच्चादिस्थग्रहफलानि, मान्दिस्थित-द्वादशभावफलानि, ग्रहयुक्तमान्दिफलवर्णनम्, संवत्सरायनादिषु जन्मफलानि, नक्षत्राणां नामान्तराणि तत्स्वामिनिदर्शनञ्च, सलक्षणानि गण्डान्तयोगजन्मफलानि, अभुक्तमूलप्रमाणं तज्जातफलञ्च, ज्येष्ठा-मूलाश्लेषादिजन्मफलम्, गण्डान्तजातस्य फलप्राप्तिकालज्ञानम्, जन्मनि तिथियोगजन्यदोषास्तदाधारे फलादेशप्रकारश्च ।

पाठ्यग्रन्थः

१. जातकपारिजातः – वैद्यनाथविरचितः ।

सहायकग्रन्थाः

१. बृहज्जातकम् – वराहमिहिरः ।
२. मानसागरी –
३. ऐतिहासिककुण्डलीदर्पण – शङ्करमानराजवंशी ।
४. भावकुतूहलम् – जीवनाथः ।
५. भावप्रकाशः – जीवनाथमिश्रः ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - पञ्चमम्

पाठ्यांशनाम- स्वराधारे फलादेशप्रकारः, शोधपद्धतिश्च

पाठ्यांशस्योद्देश्यम्

१. स्वरशास्त्रस्य तदन्तर्गतविषयाणाञ्चावबोधनम्, आयुर्दायादि-विचारावगतिश्च ।

२. पञ्चस्वराणामाधारे शुभाशुभफलकथनरीतेः परिज्ञानम् ।

३. निर्दुष्टशोधप्रस्तावलेखने सामर्थ्योत्पादनम् ।

४. शोधप्रबन्धसंरचने पाटवोत्पादनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	स्वरशास्त्रस्य प्रयोजनमहत्त्वादिज्ञानम्, - अरिष्टप्रमाणादिकञ्च	३६	२०
ख	स्वरशास्त्राधारे आयुर्दायादिविचारः	५४	३०
ग	शोधप्रस्तावलेखननियमाः	३६	२०
घ	शोधप्रबन्धसंरचने विचारणीया विषयाः	५४	३०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

स्वरशास्त्र-संरचनप्रयोजनम्, स्वरशास्त्रस्य महत्त्वादिकथनम्, अरिष्टप्रमाणम्, वेधप्रकारः, राशीशकथनम्, ग्रहाणां बलाबलनिरूपणम्, ग्रहाणां राशिभोगकालः, ग्रहाणां मुक्तादिलक्षणम्, ग्रहाणां सौम्यासौम्य-निरूपणम्, ग्रहणामुच्चनीचादिविचारः, बालारिष्टविमर्शः, दण्डेशाधारे शुभाशुभादिविचारः, अर्धयामेशविचारः, दण्डेशविचारः ।

ख) प्रकरणे

वयःसीमाविचारः, वर्षलग्नादिविचारः, केतुपातकीचक्रविचारः, दशान्तर्दशादिविचारः, केतुकुण्डलिकादिविचारः, रव्यादीनां दशाफल-

विचारः, गुरुकुण्डलीप्रकरणम्, पञ्चस्वराणां परिचयः, तिथिनक्षत्रादिस्वर-विचारः, वर्षगणितप्रकारः, कर्मादिकोष्ठसाधनम्, तिथ्यादिसाधनप्रकारः, निधनयोगचक्रविचारः, बालारिष्टविचारः, पितुररिष्टविचारः, पुंस्त्र्यादि-जन्मज्ञानोपायाः, मेषादिद्रेष्काणजस्वरूपवर्णनम्, जारजादियोगवर्णनम्।

ग) प्रकरणे

१) शोधशीर्षकचयनम् ।

२) शोधप्रस्तावः ।

क) शोधविषयकसमस्याकथनम् ।

ख) अनुसन्धेयविषयपरिचयः ।

ग) अनुसन्धेयविषयस्यावश्यकता ।

घ) अनुसन्धेयविषयोपयोगिता ।

ङ) अनुसन्धेयविषयक्षेत्रम् ।

च) अनुसन्धेयविषयमहत्त्वम् ।

घ) प्रकरणे

१. शोधप्रबन्धलेखननियमाः ।

क) सामग्रीसङ्कलनम् ।

अ) पत्रपद्धतिः (Card System) ।

आ) टिप्पणीविधिः (Notes System) ।

इ) पुस्तकालयप्रयोगः ।

ई) प्रश्नोत्तरेण तद्विषयकज्ञानोपार्जनप्रकारः ।

ख) शोधप्रबन्धस्याध्यायाः ।

ग) अध्यायस्य शीर्षकस्थानम् ।

घ) मूलपाठः ।

ङ) उपशीर्षकस्थानम् ।

च) मूलपाठः ।

छ) पादटिप्पणी (टिप्पणीलेखनप्रकारः) ।

ज) सदर्भग्रन्थसूची ।

झ) परिशिष्टम् ।

ञ)   अनुक्रमणिका ।

ट)   पारिंभाषिकशब्दावली (अर्थसहिता) ।

आवरणपृष्ठम्

१.   शोधप्रबन्धशीर्षकस्थानम् (विषयः) ।

२.   सम्बद्धसंस्थाया मुद्रिका (Logo) ।

३.   निर्देशकनामाङ्कनस्थानम् ।

४.   अनुसन्धातुर्नामाङ्कनस्थानम् ।

५.   शोधप्रबन्धप्रस्तुतवर्षोट्टङ्कनस्थानम् ।

पाठ्यग्रन्थाः

१.   पञ्चस्वराः – प्रजापतिः ।

सन्दर्भगन्थौ

१.   अनुसन्धानपद्धति – डा. भागीरथप्रसाद त्रिपाठी ।

२.   अनुसन्धानप्रबन्धको रूप र शैली – चूडामणि बन्धु ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

सर्वदर्शनम्

स्तरगतोद्देश्यम्

१. इह व्यवहार भूमौ परीक्षकजनसंसदि वा ज्ञातुमिष्टमर्थं यथायथं प्रतिपादयन् प्रतिपादयिताऽवधेयवचनो भवति विदुषाम्, अनीप्सितमर्थं प्रतिपादयँस्तु विचारशीलैरुन्मतवदुपेक्षां प्राप्नोति कश्च प्रतिपित्सितोऽर्थ इति जिज्ञासायां यो ज्ञातः सन्निहलोके परलोके च अभ्युदयनिःश्रेयसं साधयेत् स इति मनीषिणां मतिः। कस्यचिदपि देशस्य विचारशास्त्रं दर्शनशास्त्रं वाऽतुलनीयं रिक्थं भवति । दर्शनशास्त्रेण विचारशास्त्रेणैव मानवः पशुना भिद्यतेऽन्यथाऽऽहारनिद्राभयमैथुनानि तु पशुतुल्यान्येव मानवानामपि। तथा च स्वकीयदर्शनशास्त्रस्य रक्षणं तस्य देशस्य परमं कर्तव्यमेवेति मन्तव्यमेव । शास्त्ररक्षा चाधीतिबोधाचरणप्रचारणैर्भवति, तदर्थं दर्शनशास्त्रस्य पाठ्यक्रमे निवेशः सर्वथौचित्यमावहतीत्यत्र न भवेन्मतभेदः कस्यचिदपि । प्राच्य देशेषु दार्शनिकप्रधानोऽस्मद्देशो नेपाल आर्यदर्शनानां संरक्षकरूपेणावर्तत सदैव । आर्यदर्शनानि प्राच्यदर्शनानि वा वैदिका-वैदिकनास्तिकास्तिकादि भेदेन वा भिन्नानि बहूनि तेषां भेदे कारणञ्च भिन्नरूचीनां मानवानां रुच्यनुसारं चिन्तनमार्गं साधनमार्गं वा प्रस्तोतुमिति कथयितुं शक्यते । किञ्च सोपानश्रेणीन्यायेन स्थूलारुन्धतीन्यायेन वाऽस्माकं दर्शनानि तत्त्वं ग्राहयन्तीति सर्वदर्शनशास्त्राध्यायनेनैव तत्त्वज्ञानं कर्तुं शक्यत इति कथयितुं शक्यते । तथा च मानवः स्वकीये जीवने सर्वदा मानवतासंरक्षणे समर्थः स्यात् सर्वेषामेव मानवानां कल्याणाय प्रवर्तेतेति नेपालदेशे सर्वदर्शनशास्त्राध्ययनस्य प्राथमिकम् उद्देश्यम् मन्तव्यम् ।

२. संस्कृतविश्वविद्यालयस्य विद्यापीठेषु सर्वदर्शनविषयस्याचार्य-

परीक्षान्तं प्राध्यापनसामर्थ्योत्पादनममपि स्तरगतमुद्देश्यम् ।

३. शोधकार्ये सामर्थ्योत्पादनम् ।

४. सर्वदर्शनविषयस्योच्चतमज्ञानसम्पादनम् ।

५. राजकीयप्रज्ञाप्रतिष्ठानादिषु दर्शनविषयस्य प्रातिनिध्यं कर्तुं समर्थाया जनशक्तेरुत्पादनम् ।

६. सर्वदर्शनविषये गभीरविवेचनसामर्थ्योत्पादनम् ।

७. दार्शनिकप्रवचनेन सामान्यजनानां मनःसु शान्तिभावनामुत्पादयितुं समर्थस्य जनस्योत्पादनम् ।

८. विविधदर्शनग्रन्थानां सम्पादने समर्थस्य जनस्योत्पादनम् ।

९. सर्वदर्शनविषयस्य व्यवहारविधौ विनियोजनसामर्थ्योत्पादनम्।

१०. सर्वदर्शनविषयस्य वैयक्तिकीं सामाजिकीञ्चोपयोगितां प्रकटयितुं समर्थस्य जनस्योत्पादनम् ।

११. सर्वदर्शनविषये विद्यावारिध्युपाधिप्राप्तये शोधप्रबन्धलेखन-समर्थस्य जनस्योत्पादनम् ।

१२. आत्मसंयमादिनैतिकगुणसंपादनेन सच्चरित्रस्य जनस्योत्पादने प्रयत्नकरणम् ।

विषयशिक्षणोद्देश्यम्

१. त्रिविधदुःखात्यन्तनिवृत्तिः पुरुषार्थः सचात्मज्ञानेन तत्त्वज्ञानापर पर्यायेण भवतीति राद्धान्तमाश्रित्य दर्शनशास्त्रे प्रस्थानभेदाः परमपुरुषार्थसाधनाय रुचीनां वैचित्र्यादिदमेव प्रस्थानं पथ्यमिदमेव ग्राह्यमित्यादिरूपेण मनीषिभिः प्रतिपादिताः । सामान्यतः सर्वेषां भेदानां सम्यग्ज्ञानेन कतरः पन्थाः श्रेयस्कर इति ज्ञातुं सामान्योऽपि जनः समर्थोभवेत् किञ्च स्वरुच्यनुसारं सरलं पन्थानमनुसृत्य श्रेयः प्राप्नुयादित्युद्देश्यमादाय सर्वदर्शनविषयस्य अध्ययनबोधा-चरणप्रचारणानां प्रवर्तनमस्यविषयस्याध्ययनस्य प्रयोजनम् ।

२. दर्शनशास्त्रे रूचीनां वैचित्र्यात्प्रस्थानभेदाः सन्तीति न तिरोहितम्। तथा च सर्वदर्शनविषये प्रस्थानभेदानुसारं विषयगतमुद्देश्यं भिन्नं

भवेदिति स्वाभाविकमेव । तथा च तत्र प्रथमपत्रत्वेन निर्धारित-स्यार्हतदर्शनविषयस्य शिक्षणस्योद्देश्यम् प्राथम्येनोपस्थापनम् ।

३. वर्धमानस्य चतुर्ण्णामतिशयानां प्रतिपादनम् ।

४. अर्हतमतमनुसृत्य वैशेषिकमतपरीक्षा ।

५. जैनमतमनुसृत्य नैयायिकमतसमालोचनम् ।

६. पूर्वमीमांसामतसमीक्षणं जैनानुसारम् ।

७. वेदान्तमतपर्यालोचनमनेकान्तवादानुसारम् ।

८. सांख्यमतविश्लेषणं जैनमतमनुसृत्य ।

९. जैनमतमनुसृत्य बौद्धसिद्धान्तपर्यवेक्षणम् ।

१०. अनेकान्तवादमनुसृत्य चार्वाकमतखण्डनम् ।

११. अनेकान्तवादस्थापनम्, जैनसिद्धान्तस्य दोषरहितत्वसाधनञ्च ।

१२. मीमांसामनुसृत्य धर्मलक्षणस्य धर्मे प्रमाणस्य च विचारः। धर्म-लक्षणप्रमाणादिज्ञानेन शास्त्रविषये संशयरहितज्ञानोत्पादनम् ।

१३. अर्थवादस्य धर्मे प्रामाण्यप्रतिपादनम्, स्मृतीनां धर्मे प्रामाण्यप्रति-पादनम् ।

१४. मन्त्राणां सार्थक्यं प्रतिपाद्य होलाकादिशिष्टाचाराणां धर्मे प्रामाण्यं न वेति विचारः ।

१५. प्रत्यभिज्ञापदविवेचनम् । ईश्वरविषयकसन्देहानुपपत्तिविवेचनञ्च।

१६. जीवनं किमिति विवेचनम्, ज्ञानक्रिययोः सिद्धिश्च ।

१७. पूर्वपक्षरूपेण भेदतो विश्वाभासविवेचनम्, ज्ञानस्मृत्यपोहनशक्ति-मतो विवेचनञ्च ।

१८. स्मृतितत्त्वनिरूपणम्, ज्ञानशक्तिनिरूपणम्, अपोहनशक्ति-निरूपणञ्च ।

१९. स्मृत्यादीनामेकाश्रयस्य महेश्वरस्यनिरूपणम्, माहेश्वर्यनिरूपणम्।

२०. परमेश्वरे कीदृशी क्रियेति विवेचनम्, निर्माणशक्तिविवेचनञ्च ।

२१. प्रमाप्रमाणप्रमेयदीनां विवेचनं प्रत्यभिज्ञानुसारं प्रमातुर्महेश्वरस्य च विवेचनम् ।

२२. सादाख्यतत्त्वविवेचनमीश्वरतत्त्वविवेचनम्, सद्विद्याविवेचनञ्च ।

२३. विद्याशक्तिमायाशक्त्योर्विवेचनम् , मेयविवेचनं बाह्यान्तःकरणावल्योर्विवेचनम् ।

२४. रुद्रब्रह्म विष्ण्वादीनां विवेचनम्, संसारिणो मुक्तस्य च विवेचनम्, प्रत्युःपशोश्च विवेचनम् ।

२५. मलनिरूपणमाणवमलं कार्ममलं मायीयमलञ्च ।

२६. विज्ञानाकलप्रलयाकलसकलभेदनिरूपणम्, सुषुप्त्याद्यवस्थाभेदनिरूपणञ्च ।

२७. जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतावस्थानां हेयोपादेयत्वविवेचनम्।

२८. परमशिवतत्त्वनिरूपणम्, प्रत्यभिज्ञामार्गस्य सुघटत्वं नवत्वञ्चेति निरूपणञ्च ।

२९. तत्त्वसंग्रहग्रन्थानुबन्धचतुष्टयबोधनम्, बौद्धमतमनुसृत्यसांख्याभिमतप्रकृतिपरीक्षा ।

३०. ईश्वरसाधकहेतूपन्यास ईश्वरपरीक्षा, प्रकृतीश्वरोभयपरीक्षा बौद्धमतमनुसृत्य ।

३१. स्वाभाविक जगद्वादपरीक्षा, शब्दब्रह्मपरीक्षा च ।

३२. पुरुषपरीक्षणमात्मपरीक्षणं शान्तरक्षितमतमनुसृत्य ।

३३. बौद्धमतमनुसृत्य स्थिरभावपरीक्षणं कर्मफलसम्बन्धपरीक्षणम्।

३४. बौद्धानुसारं द्रव्यपदार्थपरीक्षणं गुणपदार्थपरीक्षणञ्च ।

३५. बौद्धमतमनुसृत्य कर्मपदार्थपरीक्षणम्, सामान्यपदार्थपरीक्षणञ्च।

३६. बौद्धमतानुसारं विशेषपदार्थपरीक्षणम्, समवायपदार्थपरीक्षणञ्च।

३७. अनुसन्धानशब्दविवेचनपूर्वकमनुसन्धानप्रक्रियोपस्थापनम्, तत्र वैज्ञानिकविधेः परिचयश्च ।

३८. अनुसन्धानाधिकारविवेचनम्, शोधग्रन्थस्वरूपकीदृशं भवेदिति विवेचनादिकञ्च ।

३९. आलोचनानुसन्धानभेदनिरूपणपूर्वकमैतिहासिकानुसन्धानादिविवेचनम् ।

४०. अनुसन्धाने चिन्तनशक्तेर्महत्त्वोपस्थापनपूर्वकं चिन्तनशक्तिवृद्ध्युपायविवेचनम् ।

४१. अनुसन्धाने कल्पनायाः स्वोपज्ञतायाश्च महत्त्वविवेचनम् ।

४२. अनुसन्धाने मननचिन्तनयोरूपयोगविवेचनम्, संवेगशक्तेर्विवेचनञ्च ।

४३. कल्पनायाः प्रयोगोऽनुसन्धाने कथं कर्तव्य इति विवेचनम् ।

४४. भागवतीयसांख्यदर्शनविवेचनम्, प्रसङ्गेन कपिलावतारविवेचनम्।

४५. देवहूतिकपिलसंवादे कपिलप्रोक्तभक्तियोगनिरूपणम् ।

४६. महदादितत्त्वानामुत्पत्तिवर्णनम्, प्रकृतिपुरुषविवेकफलविवेचनम्।

४७. सबीजयोगस्वरूपविवेचनम्, देहगेहासक्तपुरुषगतिविवेचनादिकञ्च ।

४८. जीवस्य देहप्राप्तिः कथमिति विवेचनपुरःसरं धूमादिमार्गगतिविवेचनम् ।

४९. देवहूतिकृताया भगवत्स्तुतेर्विवेचनम्, देवहूतेर्ब्रह्मभावापत्तिविवेचनञ्चेत्यादिविषयाणां ज्ञानोत्पादनं सर्वदर्शनविषयकाचार्यपरीक्षायां प्रथमखण्डस्य विषयगतोद्देश्यं वर्तते ।

पाठ्यक्रमपरिचयः

पत्रनाम	पाठ्यांशनाम	पूर्णाङ्काः	उत्तीर्णाङ्काः
प्रथमपत्रम्	जैनदर्शनम्	१००	४०
द्वितीयपत्रम्	पूर्वमीमांसादर्शनम्	१००	४०
तृतीयपत्रम्	प्रत्यभिज्ञादर्शनम्	१००	४०
चतुर्थपत्रम्	बौद्धदर्शनम्	१००	४०
पञ्चमंपत्रम्	शोधपद्धतिः, मूलविषये भागवतीयं सांख्यदर्शनञ्च	१००	४०

पत्रम् - प्रथमम्

पाठ्यांशनाम- जैनदर्शनम्

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	मूलातिशयप्रतिपादनं वैशेषिकमतखण्डनम्	३६	२०
ख	वैशेषिकपदार्थखण्डनपूर्वकमात्मविभुत्वखण्डनं न्यायमतखण्डनपूर्वकमीमांसामतखण्डनम्	३६	२०
ग	ब्रह्माद्वैतवादखण्डनम् सामान्यविशेषोभयात्मकवाच्यवाचकभावखण्डनं सांख्यमतखण्डनं ज्ञानाद्वैतवादक्षणिकवादशून्यवादखण्डनम्	३६	२०
घ	क्षणिकवाददोषप्रदर्शनवासनासङ्क्रमणानुपपत्तिप्रदर्शनचार्वाकमतखण्डनवस्तुतत्त्वकथनसप्तभङ्गनिरूपणानेकान्तवादखण्डनम्	३६	२०
ङ	अनेकान्तवादमुख्यभेदप्रतिपादनतः स्वाभिधानप्रकाशनवर्धमानोपासकचातुर्यप्रतिपादनप्रकरणान्तम्	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

वर्द्धमानस्यानन्तविज्ञानतीतदोषाबाध्यसिद्धान्तमर्त्यपूज्यविशेषणानां व्याख्यानम्, जिनस्याप्तमुख्यत्वप्रतिपादनम्, यथार्थवादो जैनदर्शनमुख्यं वैशिष्ट्यमिति प्रतिपादनम्, सत्यं नयवर्त्म विचारणीयमितिप्रतिपादनम्, एकान्तनित्यानित्यपक्षनिरसनम्, जगतः कर्ता कश्चिदस्तीत्यस्य खण्डनम्, ईश्वरस्य सर्वज्ञत्वस्य स्ववशत्वस्य सर्वगतत्वस्य खण्डनम्, धर्मधर्मिणोरतीवभेदे धर्मधर्मित्वं न स्याद् वृत्त्यस्ति चेन्न त्रितयं चकास्तीति प्रतिपादनम् ।

ख) प्रकरणे

वैशेषिकाभिमतषट्पदार्थविवरणपूर्वकं भेदनिरूपणवैशिष्ट्य-प्रतिपादनरूपपूर्वपक्षोपस्थापनम्, सतामपि क्वचिदेव सत्तेति कथनस्य विवेचनम्, चैतन्यमात्मनोऽन्यदित्यस्य विवेचनम्, मुक्तिः संविदानन्दमयी नेत्यस्य खण्डनम्, आत्मनो विभुत्वस्य खण्डनम्, आत्मनः काय-प्रमाणत्वस्य स्थापनम्, छलजातिनिग्रहस्थानानां परोपन्यासनिरासमात्र-फलकानामुपदेशकस्यायुक्तत्वप्रतिपादनम्, वेदविहितहिंसाया धर्म-हेतुत्वप्रतिपादनपूर्वकं तन्निरसनम्, हूयमानस्य वस्तुनो देवप्रीतिकरत्वस्य खण्डनम्, श्राद्धकरणस्य मृतजन्तूनां प्रीतिकरत्वस्य निरसनम्, वचनं पौरुषेयम् वेदाश्च पौरुषेया इति प्रतिपादनम्, ज्ञानस्य स्वप्रकाशत्व-विरोधिमीमांसकमतोपस्थापनपुरःसरं खण्डनम्, ज्ञानं स्वान्यप्रकाश्यम्, ईश्वरज्ञानान्यत्वे सति प्रमेयत्वादित्यस्य विवेचनम् ।

ग) प्रकरणे

माया सती चेद् द्वयतत्त्वसिद्धिरित्यस्य विवेचनम्, मायाऽसती चेत् कुतः प्रपञ्च इत्यस्य विवेचनम्, मायैव चेदर्थसहा च तत् किं माता च वन्ध्या च भवत्परेषामित्यस्य विवेचनम्, वेदान्तसिद्धान्तो-पस्थापनं तन्निराकरणञ्च, सामान्य विशेषोभयात्मकवाच्यवाचकभाव-स्थापनम्, स्वतन्त्रसामान्यवादस्य स्वतन्त्रविशेषवादस्य विवेचनम्, निरपेक्षसामान्यवादस्योपस्थापनपूर्वकं खण्डनं जैनमतोपस्थापनञ्च, वाच्यमेकात्मकं सदेवानेकमित्यस्य विवेचनम्, चिदर्थशून्या जडा च बुद्धिरिति विवेचनन्तत्रजैनमतोपस्थापनञ्च, शब्दादितन्मात्रजमम्बरा-दीत्यस्य विवेचनपुरःसरं खण्डनम्, न बन्धमोक्षौ पुरुषस्येत्यस्य व्याख्यानं तत्खण्डनञ्च, न तुल्यकालफलहेतुभाव इत्यस्य विवेचनम्, हेतौ विलीने न फलस्य भाव इत्यस्य विवेचनम्, ज्ञानाद्वैतवादोपस्थापनं तन्निरसनञ्च, क्षणिकवादविवेचनं निरसनञ्च, विना प्रमाणं परवन्न शून्यं स्वपक्षसिद्धेः पदमश्नुवीतेत्यस्य विवेचनम्, शून्यवादस्योपस्थापनपुरःसरं खण्डनम्, कुप्येत् कृतान्तःस्पृशते प्रमाणमित्यस्य व्याख्यानञ्च, अहो सुदृष्टं

त्वदसूयिदृष्टमित्यस्य व्याख्यापुरःसरं प्रमाणप्रमाताप्रमेयप्रमिति चतुष्टयं परिकल्पितमवस्त्वेवेतित्यस्य विवेचनपुरःसरं खण्डनम्, शून्यवादव्यवस्थापनस्यायुक्तत्वप्रतिपादनम्, प्रमातृसिद्धिः, प्रमेयसिद्धिः, प्रमाणसिद्धिः, प्रमितिसिद्धिश्च ।

घ) प्रकरणे

क्षणिकवादे लोकपरलोकव्यवस्था न संभवतीति प्रतिपादनम्, क्षणिकवादे पञ्चदोषप्रदर्शनम्, क्षणिकवादे कृतप्रणाशदोषप्रदर्शनम्, क्षणिकवादेऽकृतकर्मभोगदोषप्रदर्शनम्, क्षणिकवादे स्मृतिभङ्गदोषप्रदर्शनम्, क्षणिकवादे प्रमोक्षभङ्गदोषप्रदर्शनम्, क्षणिकवादे भवभङ्गदोषप्रदर्शनम्, क्षणिकवादे प्रमोक्षभङ्गदोषप्रदर्शनम्, बौद्धसम्मतमोक्षस्वरूपप्रदर्शनपूर्वकं तत्खण्डनम्, वासनया क्षणसन्तत्या च सर्वं सुघटमित्यस्य प्रतिपादनं तत्खण्डनञ्च, वासनैव न संभवतीति प्रतिपादनम्, आलयविज्ञानस्य खण्डनम्, चार्वाकमतोपस्थापनं तत्खण्डनञ्च, भूतचैतन्यवादखण्डनम्, अनेकान्तवादसमर्थने युक्तिप्रदर्शनम्, वस्तुतत्त्वस्वरूपम्, स्याद्वादमतस्थापनाय वस्तुनोऽनन्तधर्मात्मकत्वमिति प्रतिपादनम्, अपर्ययं वस्तु समस्यमानमित्यस्य विवेचनम्, अद्रव्यमेतच्च विविच्यमानमित्यस्य विवेचनम्, द्रव्यपर्यायविवेचनम्, हिंसाया निषिद्धत्वस्य प्रतिपादनम्, सप्तभङ्गानां प्रदर्शनायादेशभेदप्रदर्शनम्, सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा चेति प्रतिपादनम्, एकान्तवादिनश्च्युता भवन्तीति प्रतिपादनम्, अस्तित्वनास्तित्वादिधर्माणां परस्पर-विरोधाभावप्रतिपादनम् ।

ङ) प्रकरणे

अनेकान्तवादस्य मुख्यभेदानामुपस्थापनम्, एकं वस्तु स्यात् कथञ्चिन्नाशि स्यात् कथञ्चिन्नित्यमिति प्रतिपादनम्, स्यात्सदृशम् स्याद् विरूपमिति प्रतिपादनम्, स्याद्वाच्यम् स्यान्नवाच्यमिति प्रतिपादनम्, एकं वस्तु स्यात् सत् स्यान्नसदिति प्रतिपादनम्, नित्यैकान्तवादे दोष-

प्रदर्शनम्, एकान्तवादे सुखदुःखभोगौ न घटेते इति प्रतिपादनम्, एकान्तवादे पुण्यपापे न घटेते इति प्रतिपादनम्, दुर्नीतिवादव्यसनेनैवं परैर्विलुप्तं जगदप्यशेषमित्यस्य विवेचनम्, प्रमाणस्वरूपे प्रत्यक्ष-स्वरूपम्, परोक्षप्रमाणविवेचनम्, मितात्मवादे दोषप्रदर्शनम्, जीवा-नन्त्यवादसमर्थनम्, पृथिव्यादीनां जीवत्वसाधनम्, परदर्शनानां परस्पर-विरुद्धार्थसमर्पकतया मत्सरित्वप्रकाशनम्, जैनसिद्धान्तस्य मात्सर्या-भावत्वस्य प्रतिपादनम्, स्याद्वादस्य मुख्यमभिधेयं किमिति विवेचनम्, वर्द्धमानोपासकानामेव चातुर्यमिति प्रतिपादनम् ।

पाठ्यग्रन्थः

१. स्याद्वादमञ्जरी ।

सन्दर्भग्रन्थाः

१. दर्शनकौस्तुभः - चूडानाथभट्टरायः
२. सभाष्यं तत्त्वार्थाधिगमसूत्रम् ।
३. अयोगव्यवच्छेदिका ।
४. स्याद्वादरत्नाकरः ।

मूल्याङ्कनयोजना (प्रश्नपत्रनिर्माणयोजना)

प्रकरणानि	प्रश्नप्रकाराः		प्रश्नसङ्ख्याः		अङ्काः
			प्रष्टव्याः	समाधेयाः	
	निबन्धात्मकेषु	विवेचनात्मकाः	२	१	२०
		तुलनात्मकाः	२	१	२०
		व्याख्यात्मकाः	२	१	२०
	सङ्क्षिप्तोत्तरापेक्षिणः		६	४	४०
योगः			१२	७	१००

पत्रम् - द्वितीयम्

पाठ्यांशनाम - पूर्वमीमांसादर्शनम्

पाठ्यांशस्योद्देश्यम्

१. अथातो धर्मजिज्ञासेति सूत्रेण मीमांसादर्शनस्याध्ययनस्य प्रयोजनं विषयोऽधिकारी सम्बन्धश्चेत्यनुबन्धचतुष्टयनिरूपणं विहितम्। तत्र तेन प्रथमसूत्रेण प्रमाणस्वरूपसाधनफलैर्धर्मस्य विचारं प्रतिज्ञाय तस्य मीमांसादर्शनस्य प्रथमेऽध्याये धर्मे प्रमाणं निरूपितम्। तथा च साक्षाद् धर्मे प्रमाणभूतायाश्चोदनायाः पौरुषेयत्वादिना अप्रामाण्यहेतुशङ्कानिराकरणपूर्वकं चोदनाया धर्मे प्रामाण्यसाधनम्।

२. धर्मलक्षणोपस्थापनम्।

३. धर्मे प्रमाणान्वेषणम्।

४. प्रत्यक्षादिप्रमाणलक्षणनिरूपणपूर्वकं तेषां धर्मे प्रामाण्यं न संभवतीति प्रतिपादनम्।

५. चोदनैव (शब्द एव) धर्मे प्रमाणं संभवतीति प्रतिपादनम्।

६. वेदानामपौरुषेयत्वस्य नित्यत्वस्य च प्रतिपादनम्।

७. शब्दनित्यत्वप्रतिपादनम्, आत्मनिरूपणं शून्यवादनिरालम्बन-वादखण्डनपुरःसरम्।

८. अर्थवादानां धर्मे प्रामाण्यप्रतिपादनम्, विधिवन्निगदानां धर्मे प्रामाण्यम्।

९. हेतुवन्निगदानां धर्मे प्रामाण्यं न वेति चिन्तनम्, मन्त्राणां सार्थक्यं न वेति चिन्तनम्।

१०. स्मृतीनां धर्मे प्रामाण्यं न वेति चिन्तनम्, औदुम्बरवेष्टनस्मृतेः प्रामाण्यविषये चिन्तनम्।

११. पदार्था लोकप्रसिद्धा ग्राह्याः शास्त्रप्रसिद्धावेति चिन्तनम्, म्लेच्छ-प्रसिद्धार्थानां ग्राह्यत्वविषये विचारः।

१२. कल्पसूत्राणां धर्मे प्रामाण्यविषये चिन्तनम्, होलाकादीनां शिष्टा-चाराणां विषये चिन्तनम्, अपभ्रंशशब्दाः प्रमाणं नवेति चिन्तनम्।

१३. जातौ शक्तिर्व्यक्तौ वेति चिन्तनम् ।

१४. उद्भिदादीनां चित्रादीनामग्निहोत्रादीनां श्येनादीनां शब्दानां यागनामधेयत्वे विचारः ।

१५. यजमानः प्रस्तर इत्यादीनां विषये विचारः, यूपादिशब्दविचारः।

१६. 'अपशवो वाऽन्ये' इत्यस्य विचारः, सृष्टीरूपदधातीत्यत्र गुण-विधिरर्थवादोवेति विचारः ।

१७. अग्निहोत्रं जुहोति, श्येनेनाभिचरन् यजेत इत्यादिविधिवाक्यगता-नामग्निहोत्रादिपदानां नाम्ना कर्मभेदः, नाम्ना दूरस्थस्यानुवाद, इत्यादि प्रयोजनवत्तया कर्मनामतया च प्रामाण्यमिति प्रतिपा-दनम् ।

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	धर्मजिज्ञासातो धर्मे वेदप्रामाण्यस्थापनान्तम्	३६	२०
ख	शब्दार्थसम्बन्धस्य नित्यत्वप्रतिपादनतोऽर्थ-वादानां विधिशेषत्वप्रतिपादनम्	३६	२०
ग	विधिवन्निगदाधिकरणतः कल्पसूत्रास्वतः - प्रामाण्याधिकरणान्तम्	३६	२०
घ	मीमांसाशाबरभाष्ये प्रथमाध्यायेतृतीये पादे - होलाकाधिकरणतः पादसमाप्तिपर्यन्तम्	३६	२०
ङ	मीमांसाशाबरभाष्ये प्रथमाध्याये चतुर्थपादः	३६	२०
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

वेदाध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति प्रतिपादनम्, धर्म-लक्षणप्रतिपादनम्, धर्मलक्षणे प्रमाणान्वेषणम्, मीमांसानुसारं प्रत्यक्षा-नुमानप्रमाणलक्षणोपस्थापनम्, शब्दप्रमाणस्वरूपोपस्थापनम्, शब्दार्थ-